महर्षि जैमिनि प्रणीतं कर्ममीमांसादर्शनम्

प्रथमोऽध्यायः प्रथमः पादः

अथातो धर्मजिज्ञासा १ चोदनालक्षणोऽर्थो धर्मः २ तस्य निमित्तपरीष्टिः ३ सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ४ औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ५ कर्मैके तत्र दर्शनात् ६ अस्थानात् ७ करोति शब्दात् ८ सत्त्वान्तरे यौगपद्यात् ९ प्रकृतिविकृत्योश्च १० वृद्धिश्च कर्तृभूम्नास्य ११ समं तु तत्र दर्शनम् १२ सतः परमदर्शनं विषयानागमात् १३ प्रयोगस्य परम् १४ आदित्यवद्यौगपद्यम् १५ वर्णान्तरमविकारः १६ नादवृद्धिपरा १७ नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् १८ सर्वत्र यौगपद्यात् १९ संख्याभावात् २० अनपेक्षत्वात् २१ प्रख्याभावाच्च योगस्य २२ लिङ्गदर्शनाच्च २३ उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात् २४ तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् २५ लोके संनियमात्प्रयोगसंनिकर्षः स्यात् २६ वेदांश्चैके संनिकर्षं पुरुषाख्याः २७ अनित्यदर्शनाच्च २८ उक्तन्तु शब्दपूर्वत्वम् २९ आख्या प्रवचनात् ३० परन्तु श्रुतिसामान्यमात्रम् ३१ कृते वा विनियोगः स्यात्कर्मणः सम्बन्धात् ३२

इति प्रथमः पादः

द्वितीयः पादः

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते १ शास्त्रदृष्टविरोधाच्च २ तथाफलाभावात् ३ अन्यानर्थक्यात् ४ अभागिप्रतिषेधाच्च ५ अनित्यसंयोगात् ६ विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ७ तुल्यं च साम्प्रदायिकम् ८ अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत ९ गुणवादस्तु १० रूपात्प्रायात् ११ दूरभूयस्त्वात् १२ स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् १३ आकालिकेप्सा १४ विद्याप्रशंसा १५ सर्वत्वमाधिकारिकम् १६ फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः

स्यात् १७ अन्त्ययोर्यथोक्तम् १८ विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् १९ लोकवदिति चेत् २० न पूर्वत्वात् २१ उक्तन्तु वाक्यशेषत्वम् २२ विधिश्चानर्थकः क्वचित्तस्मात्स्तुतिः प्रतीयेत तत्सा-मान्यादितरेषु तथात्वम् २३ प्रकरणे सम्भवन्नपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति २४ विधौ च वाक्यभेदः स्यात् २५ हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् २६ स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य २७ व्यर्थे स्तुतिरन्याय्येति चेत् २८ अर्थस्तु विधिशेषत्वाद्यथालोके २९ यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ३० तदर्थशास्त्रात् ३१ वाक्यनियमात् ३२ बुद्धशास्त्रात् ३३ अविद्यमानवचनात् ३४ अचेतनेऽर्थे खल्वर्थं निबन्धनात् ३५ अर्थविप्रतिषेधात् ३६ स्वाध्यायवदवचनात् ३७ अविज्ञेयात् ३८ अनित्यसंयोगान्मन्त्रानर्थक्यम् ३९ अविशिष्टस्तु वाक्यार्थः ४० गुणार्थेन पुनः श्रुतिः ४१ परिसंख्या ४२ अर्थवादो वा ४३ अविरुद्धं परम् ४४ सम्प्रैषे कर्मगर्हानुपालम्भः संस्कारत्वात् ४५ अभिधानेऽर्थवादः ४६ गुणादविप्रतिषेधः स्यात् ४७ विद्यावचनमसंयोगात् ४८ सतः परमविज्ञानम् ४९ उक्तश्चानित्यसंयोगः ५० लिङ्गोपदेशश्च तदर्थवत् ५१ ऊहः ५२ विधिशब्दाश्च ५३

इति द्वितीयः पादः

तृतीयः पादः

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् १ अपि वा कर्तृसामा-न्यात्प्रमाणमनुमानं स्यात् २ विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ३ हेतुदर्शनाच्च ४ शिष्टाकोपेऽविरुद्धमिति चेत् ५ न शास्त्रपरिमाणत्वात् ६ अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ७ तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ८ शास्त्रास्था वा तन्निमित्तत्वात् ९ चो-दितं तु प्रतीयेताविरोधात्प्रमाणेन १० प्रयोगशास्त्रमिति चेत् ११ नासंनियमात् १२ अवाक्यशेषाच्च १३ सर्वत्र प्रयोगात्संनिधानशास्त्राच्च १४ अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् १५ अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य १६ दर्शनाद्विनियोगः स्यात् १७ लिङ्गाभावाच्च

नित्यस्य १८ आख्या हि देशसंयोगात् १९ न स्याद्देशान्तरेष्विति चेत् २० स्याद्योगाख्या हि माथुरवत् २१ कर्मधर्मो वा प्रवणवत् २२ तुल्यं तु कर्तृधर्मेण २३ प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् २४ शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् २५ अन्यायश्चानेकशब्दत्वम् २६ तत्र तत्त्वमभियोगविशेषात्स्यात् २७ तदशक्तिश्चानुरूपत्वात् २८ एकदेशत्वाच्च विभक्तिव्यत्यये स्यात् २९ प्रयोगचोदनाभावादर्थैकत्व-मविभागात् ३० अद्रव्यशब्दत्वात् ३१ अन्यदर्शनाच्च ३२ आकृतिस्तु क्रियार्थत्वात् ३३ न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमिति चेत् ३४ तदर्थत्वात्प्रयोगस्याविभागः ३५

इति तृतीयः पादः

चतुर्थः पादः

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् १ अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् २ यस्मिन्गुणोपदेशः प्रधानतोऽभिसम्बन्धः ३ तत्प्रख्यञ्चान्यशास्त्रम् ४ तद्व्यपदेशं च ५ नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ६ तुल्यत्वात्क्रिययोर्न ७ ऐकशब्द्ये परार्थवत् ८ तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः ९ बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः १० प्रोक्षणीष्वर्थसंयोगात् ११ तथानिर्मन्थ्ये १२ वैश्वदेवे विकल्प इति चेत् १३ न वा प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य १४ मिथश्चानर्थसम्बन्धः १५ परार्थत्वाद्गुणानाम् १६ पूर्ववन्तोऽवि-धानार्थास्तत्सामर्थ्यं समाम्नाये १७ गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्तास्ति १८ तच्छेषो नोपपद्यते १९ अविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् २० कारणं स्यादिति चेत् २१ आनर्थक्यादकारणं कर्तुर्हि कारणानि गुणार्थो हि विधीयते २२ तत्सिद्धिः २३ जातिः २४ सारुप्यम् २५ प्रशंसा २६ भूमा २७ लिङ्गसमवायः २८ संदिग्धेषु वाक्यशेषात् २९ अर्थाद्वा कल्पनैकदेशत्वात् ३०

इति चतुर्थः पादः इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः प्रथमः पादः

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते १ सर्वेषां भावोऽर्थ इति चेत् २ येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात्स्वे प्रयोगे ३ येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्या तानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य ४ चोदना पुनरारम्भः ५ तानि द्वैधं गुणप्रधानभूतानि ६ यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ७ यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ८ धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ९ तुल्यश्रुतित्वाद्वेतरैः सधर्मः स्यात् १० द्रव्योपदेश इति चेत् ११ न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् १२ स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात् १३ अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् १४ वशावद्वागुणार्थं स्यात् १५ न श्रुतिसमवायित्वात् १६ व्यपदेशभेदाच्च १७ गुणश्चानर्थकः स्यात् १८ तथा याज्यापुरोरुचोः १९ वशायामर्थसमवायात् २० यत्रेति वार्थवत्त्वात्स्यात् २१ न त्वाम्नातेषु २२ दृश्यते २३ अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् २४ शब्दपृथक्त्वाच्च २५ अनर्थकं च तद्वचनम् २६ अन्यश्चार्थः प्रतीयते २७ अभिधानं च कर्मवत् २८ फलनिर्वृत्तिश्च २९ विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ३० अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधान-वाची स्यात् ३१ तच्चोदकेषु मन्त्राख्या ३२ शेषे ब्राह्मणशब्दः ३३ अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः ३४ तेषामृग्यत्रार्थवशेन पादव्यवस्था ३५ गीतिषु सामाख्या ३६ शेषे यजुः शब्दः ३७ निगदो वा चतुर्थं स्याद्धर्मविशेषात् ३८ व्यपदेशाच्च ३९ यजूंषि वा तद्रूपत्वात् ४० वचनाद्धर्मविशेषः ४१ अर्थाच्च ४२ गुणार्थो व्यपदेशः ४३ सर्वेषामिति चेत् ४४ न ऋग्व्यपदेशात् ४५ अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ४६ समेषु वाक्यभेदः स्यात् ४७ अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ४८ व्यवायान्नानुषज्येत ४९

इति प्रथमः पादः

द्वितीयः पादः

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् १ एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् २ प्रकरणन्तु पौर्णमास्यां रूपावचनात् ३ विशेषदर्शनाच्च सर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ४ गुणस्तु श्रुतिसंयोगात् ५ चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ६ व्यपदेशश्च तद्वत् ७ लिङ्गदर्शनाच्च ८ पौर्णमासीवदुपांशुयाजः स्यात् ९ चोदना वाप्रकृतत्वात् १० गुणोपबन्धात् ११ प्राये वचनाच्च १२ आघाराग्निहोत्रमरूपत्वात् १३ संज्ञोपबन्धात् १४ अप्रकृतत्वाच्च १५ चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधेर्गुणार्थेन पुनः श्रुतिः १६ द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन १७ अचोदकाश्च संस्काराः १८ तद्भेदात्कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्याद्भेदो द्रव्यगुणीभावात् १९ संस्कारस्तु न भिद्येत परार्थत्वाद्द्रव्यस्य गुणभूतत्वात् २० पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात् २१ संज्ञा चोत्पत्तिसंयोगात् २२ गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् २३ अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत २४ फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात् २५ अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत २६ समेषु कर्मयुक्तं स्यात् २७ सौभरे पुरुषश्रुतेर्निधने कामसंयोगः २८ सर्वस्य वोक्तकामत्वात्तस्मिन्कामश्रुतिः स्यान्निधनार्था पुनः श्रुतिः २९

इति द्वितीयः पादः

तृतीयः पादः

गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्संयोगस्याशेषभूतत्वात् १ एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात् २ अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ३ आधाने सर्वशेषत्वात् ४ अयनेषु चोदनान्तरं संज्ञोपबन्धात् ५ अगुणा च कर्मचोदना ६ समाप्तं च फले वाक्यम् ७ विकारो वा प्रकरणात् ८ लिङ्गदर्शनाच्च ९ गुणात्संज्ञोपबन्धः १० समाप्तिरविशिष्टा ११ संस्कारश्चाप्रकरणेऽकर्म शब्दत्वात् १२ यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् १३ यजतिस्तु

द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धात् १४ लिङ्गदर्शनाच्च १५ विषये प्रायदर्शनात् १६ अर्थवादोपपत्तेश्च १७ संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् १८ पात्नीवते तु पूर्वत्वादवच्छेदः १९ अद्रव्यत्वात्केवले कर्मशेषः स्यात् २० अग्निस्तु लिङ्गदर्शनात्क्रतुशब्दः प्रतीयेत २१ द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् २२ तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि २३ प्रकरणान्तरे प्रयोजनान्यत्वम् २४ फलं चाकर्मसंनिधौ २५ संनिधौ त्वविभागात्फलार्थेन पुनः श्रुतिः २६ आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयेत २७ अविभागात्तु कर्मणो द्विरुक्तेर्न विधीयते २८ अन्यार्था वा पुनः श्रुतिः २९

इति तृतीयः पादः

चतुर्थः पादः

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् १ कर्तुर्वा श्रुतिसंयोगात् २ लिङ्गदर्शनाच्च कर्मधर्मे हि प्रक्रमेण नियम्येत तत्रानर्थकमन्यत्स्यात् ३ व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात् ४ अनित्यत्वात्तु नैवं स्यात् ५ विरोधश्चापि पूर्ववत् ६ कर्तुस्तु धर्मनियमात्कालशास्त्रं निमित्तं स्यात् ७ नामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्तिसमाप्तिव-चनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् ८ एकं वा संयोगरूपचोदनाख्याविशेषात् ९ न नाम्ना स्यादचोदनाभिधानत्वात् १० सर्वेषां चैककर्म्यं स्यात् ११ कृतकं चाभिधानम् १२ एकत्वेऽपि परम् १३ विद्यायां धर्मशास्त्रम् १४ आग्नेयवत्पुनर्वचनम् १५ अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् १६ वाक्यासमवायात् १७ अर्थासंनिधेश्च १८ न चैकं प्रतिशिष्यते १९ समाप्तिवच्च सम्प्रेक्षा २० एकत्वेऽपि पराणि निन्दाशक्तिसमाप्तिवचनानि २१ प्रायश्चित्तं निमित्तेन २२ प्रक्रमाद्वा नियोगेन २३ समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत २४ लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद्द्वादशाहस्याहारव्यपदेशः स्यात् २५ द्रव्ये चाचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद्व्यतिष्ठेत तस्मान्नित्यानुवादः स्यात् २६ विहितप्रतिषेधात्पक्षेऽतिरेकः स्यात् २७ सारस्वते विप्रतिषेधाद्यदेति स्यात् २८ उपहव्येऽप्रतिप्रसवः २९ गुणार्था

वा पुनः श्रुतिः ३० प्रत्ययं चापि दर्शयति ३१ अपि वा क्रमसंयो-
गाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत ३२ विरोधिना त्वसंयोगादैककर्म्ये
तत्संयोगाद्विधीनां सर्वकर्मप्रत्ययः स्यात् ३३

इति चतुर्थः पादः इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः प्रथमः पादः

अथातः शेषलक्षणम् १ शेषः परार्थत्वात् २ द्रव्यगुणसंस्कारेषु
बादरिः ३ कर्माण्यपि जैमिनिः फलार्थत्वात् ४ फलं च पुरुषा-
र्थत्वात् ५ पुरुषश्च कर्मार्थत्वात् ६ तेषामर्थेन सम्बन्धः ७
विहितस्तु सर्वधर्मः स्यात्संयोगतोऽविशेषात्प्रकरणाविशेषाच्च ८
अर्थलोपादकर्म स्यात् ९ फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे
स्यात् १० द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ११ अर्थैकत्वे
द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् १२ एकत्वयुक्तमेकस्य श्रुतिसं-
योगात् १३ सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् १४ चोदिते
तु परार्थत्वाद्यथाश्रुति प्रतीयेत १५ संस्काराद्वा गुणानामव्यवस्था
स्यात् १६ व्यवस्था वार्थस्य श्रुतिसंयोगात्तस्य शब्दप्रमाणत्वात्
१७ आनर्थक्यात्तदङ्गेषु १८ कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः
स्यात् १९ साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण २० संदिग्धेषु
व्यवायाद्वाक्यभेदः स्यात् २१ गुणानां च परार्थत्वादसम्बन्धः सम-
त्वात्स्यात् २२ मिथश्चानर्थसम्बन्धात् २३ आनन्तर्यमचोदना २४
वाक्यानां च समाप्तत्वात् २५ शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत
मिथस्तेषामसम्बन्धात् २६ व्यवस्था वार्थसंयोगाल्लिङ्गस्यार्थेन
सम्बन्धाल्लक्षणार्था गुणश्रुतिः २७

इति प्रथमः पादः

द्वितीयः पादः

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेन
नित्यसंयोगात् १ संस्कारकत्वादचोदिते न स्यात् २ वचनात्त्वयथार्थ-
मैन्द्री स्यात् ३ गुणाद्वाप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वात् ४

तथाह्वानमपीति चेत् ५ न कालविधिश्चोदितत्वात् ६ गुणाभावात् ७ लिङ्गाच्च ८ विधिकोपश्चोपदेशे स्यात् ९ तथोत्थानविसर्जने १० सूक्तवाके च कालविधिः परार्थत्वात् ११ उपदेशो वा याज्याशब्दो हि नाकस्मात् १२ स देवतार्थस्तत्संयोगात् १३ प्रतिपत्तिरिति चेत् १४ स्विष्टकृद्वदुभयसंस्कारः स्यात् १६ कृत्स्नोपदेशादुभयत्र सर्ववचनम् १७ यथार्थं वा शेषभूतसंस्कारात् १८ वचनादिति चेत् १९ प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः २० लिङ्गक्रमसमाख्यानात्काम्य-युक्तं समाम्नानम् २१ अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् २२ तदाख्यो वा प्रकरणोपपत्तिभ्याम् २३ अनर्थकश्चोपदेशः स्याद-सम्बन्धात्फलवता न ह्युपस्थानं फलवत् २४ सर्वेषां चोपदिष्ट-त्वात् २५ लिङ्गसमाख्यानाभ्यां भक्षार्थतानुवाकस्य २६ तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् २७ गुणाभिधानान्मन्द्रा-दिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् २८ लिङ्गविशेषनिर्देशात्समा-नविधानेष्वनैन्द्राणाममन्त्रत्वम् २९ यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ३० पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ३१ अपनयाद्वा पूर्वस्यानुपलक्षणम् ३२ अग्रहणाद्वानपायः स्यात् ३३ पात्नीवते तु पूर्ववत् ३४ ग्रहणाद्वापनीतं स्यात् ३५ त्वष्टारं तूपलक्षयेत्पानात् ३६ अतुल्यत्वात्तु नैवं स्यात् ३७ त्रिंशच्च परार्थत्वात् ३८ वषट्कारश्च कर्तृवत् ३९ छन्दः प्रतिषेधस्तु सर्वगामित्वात् ४० ऐन्द्राग्ने तु लिङ्गभावात्स्यात् ४१ एकस्मिन्वा देवतान्तराद्विभागवत् ४२ छन्दश्च देवतावत् ४३ सर्वेषु वाभावादेकच्छन्दसः ४४ सर्वेषां वैकमत्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हि ४५

इति द्वितीयः पादः

तृतीयः पादः

श्रुतेर्जाताधिकारः स्यात् १ वेदो वा प्रायदर्शनात् २ लिङ्गाच्च ३ धर्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ४ त्रयीविद्याख्या च तद्विद्धि ५ व्यतिक्रमे यथाश्रुतीति चेत् ६ न सर्वस्मिन्निवेशात् ७ वेदसंयोगान्न प्रकरणेन बाध्येत ८ गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः

९ भूयस्त्वेनोभयश्रुति १० असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् ११ क्रमश्च देशसामान्यात् १२ आख्या चैवं तदर्थत्वात् १३ श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् अहीनो वा प्रकरणाद्गौणः १४ असंयोगात्तु मुख्यस्य तस्मादपकृष्यते १५ द्वित्वबहुत्वयुक्तं वा चोदनात्तस्य १६ पक्षेणार्थकृतस्येति चेत् १७ न प्रकृतेरेकसंयोगात् १८ जाघनी चैकदेशत्वात् १९ चोदना वापूर्वत्वात् २० एकदेश इति चेत् २१ न प्रकृतेरशास्त्रनिष्पत्तेः २२ संतर्दनं प्रकृतौ क्रयणवदनर्थलोपात्स्यात् २३ उत्कर्षो वा ग्रहणाद्विशेषस्य २४ कर्तृतो वा विशेषस्य तन्निमित्तत्वात् २५ क्रतुतो वार्थवादानुपपत्तेः स्यात् २६ संस्थाश्च कर्तृवद्धारणार्थाविशेषात् २७ उक्थ्यादिषु वार्थस्य विद्यमानत्वात् २८ अविशेषात्स्तुतिर्व्यर्थेति चेत् २९ स्यादनित्यत्वात् ३० संख्यायुक्तं क्रतोः प्रकरणात्स्यात् ३१ नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात् ३२ पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ ३३ तत्सर्वार्थमविशेषात् ३४ चरौ वार्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ न स्यात् ३५ चरावपीति चेत् ३६ न पक्तिनामत्वात् ३७ स्मिन्नेकसंयोगात् ३८ धर्माविप्रतिषेधाच्च ३९ अपि वा सद्वितीये स्याद्देवतानिमित्तत्वात् ४० लिङ्गदर्शनाच्च ४१ वचनात्सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावाद्धि चरावपेषणं भवति ४२ एकस्मिन्वार्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्यादचोदितत्वात् ४३ हेतुमात्रमदन्तत्वम् ४४ वचनं परम् ४५

इति तृतीयः पादः

चतुर्थः पादः

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् १ अपदेशो वार्थस्य विद्यमानत्वात् २ विधिस्त्वपूर्ववत्त्वात्स्यात् ३ स प्रायात्कर्मधर्मः स्यात् ४ वाक्यशेषत्वात् ५ तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ६ तत्प्रधाने वा तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् ७ अर्थवादो वा प्रकरणात् ८ विधिना चैकवाक्यत्वात् ९ उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् १० न वा प्रकरणात्तस्य दर्शनम् ११ विधिर्वा स्यादपूर्वत्वात्

१२ उदक्त्वं चापूर्वत्वात् १३ सतो वा लिङ्गदर्शनम् १४ विधिस्तु धारणेऽपूर्वत्वात् १५ दिग्विभागश्च तद्वत्सम्बन्धस्यार्थहेतुत्वात् १६ परुषि दितपूर्णघृतविदग्धं च तद्वत् १७ अकर्म ऋतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् १८ विधिर्वा संयोगान्तरात् १९ अहीनवत्पुरुषधर्मस्तदर्थत्वात् २० प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् २१ व्यपदेशादपकृष्येत २२ शंयौ च सर्वपरिदानात् २३ प्रागपरोधान्मलवद्वाससः २४ अन्न-प्रतिषेधाच्च २५ अप्रकरणे तु तद्धर्मस्ततो विशेषात् २६ अद्रव्यत्वात्तु शेषः स्यात् २७ वेदसंयोगात् २८ द्रव्यसंयोगाच्च २९ स्याद्वास्य संयोगवत्फलेन सम्बन्धस्तस्मात्कर्मैतिशायनः ३० शेषोऽप्रकरणेऽविशे-षात्सर्वकर्मणाम् ३१ होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ३२ शेषश्च समाख्यानात् ३३ दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् ३४ अर्थवादो वानुपपातात्तस्माद्यज्ञे प्रतीयेत ३५ अचोदितं च कर्मभेदात् ३६ सा लिङ्गादार्त्विजे स्यात् ३७ पानव्यापच्च तद्वत्स्यात् ३८ दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यात् ३९ तत्सर्वत्राविशेषात् ४० स्वामिनो वा तदर्थत्वात् ४१ लिङ्गदर्शनाच्च ४२ सर्वप्रदानं हविषस्तदर्थत्वात् ४३ निरवदानात्तु शेषः स्यात् ४४ उपायो वा तदर्थत्वात् ४५ कृतत्वात्तु कर्मणः सकृत्स्याद्द्रव्यस्य गुणभूतत्वात् ४६ शेषदर्शनाच्च ४७ अप्रयो-जकत्वादेकस्मात्क्रियेरञ्छेषस्य गुणभूतत्वात् ४८ संस्कृतत्वाच्च ४९ सर्वेभ्यो वा कारणाविशेषात्संस्कारस्य तदर्थत्वात् ५० लिङ्गदर्शनाच्च ५१ एकस्माच्चेद्यथाकाम्यमविशेषात् ५२ मुख्याद्वा पूर्वकालत्वात् ५३ भक्षाश्रवणाद्दानशब्दः परिक्रये ५४ तत्संस्तवाच्च ५५ भक्षार्थो वा द्रव्ये समत्वात् ५६ व्यादेशाद्दानसंस्तुतिः ५७

इति चतुर्थः पादः

पञ्चमः पादः

आज्याच्च सर्वसंयोगात् १ कारणाच्च २ एकस्मिन्समवत्तशब्दात् ३ आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ४ अशेषत्वात्तु नैवं स्या-त्सर्वदानादशेषता ५ साधारण्यान्न ध्रुवायां स्यात् ६ अवत्तत्वाच्च

जुह्वां तस्य च होमसंयोगात् ७ चमसवदिति चेत् ८ न चोदनाविरोधाद्धविःप्रकल्पनत्वाच्च ९ उत्पन्नाधिकारात्सति सर्ववचनम् १० जातिविशेषात्परम् ११ अन्त्यमरेकार्थे १२ साकम्प्रस्थाय्ये स्विष्टकृदिडञ्च तद्वत् १३ सौत्रामण्यां च ग्रहेषु १४ तद्वच्च शेषवचनम् १५ द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन् १६ अविभागाच्च शेषस्य सर्वान्प्रत्यविशिष्टत्वात् १७ ऐन्द्रवायवे तु वचनात्प्रतिकर्म भक्षः स्यात् १८ सोमेऽवचनाद्भक्षो न विद्यते १९ स्याद्वान्यार्थदर्शनात् २० वचनानि त्वपूर्वत्वात्तस्माद्यथोपदेशं स्युः २१ चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात् २२ उद्गातृचमसमेकः श्रुतिसंयोगात् २३ सर्वे वा सर्वसंयोगात् २४ स्तोत्रकारिणां वा तत्संयोगाद्बहुत्वश्रुतेः २५ सर्वे तु वेदसंयोगात्कारणादेकदेशे स्यात् २६ ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात् २७ हारियोजने वा सर्वसंयोगात् २८ चमसिनां वा संनिधानात् २९ सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ३० वषट्काराच्च भक्षयेत् ३१ होमाभिषवाभ्यां च ३२ प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे ३३ स्याद्वा कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् ३४ चमसे चान्यदर्शनात् ३५ एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ३६ होता वा मन्त्रवर्णात् ३७ वचनाच्च ३८ कारणानुपूर्व्याच्च ३९ वचनादनुज्ञातभक्षणम् ४० तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात् ४१ तत्रार्थात्प्रतिवचनम् ४२ तदेकपात्राणां समवायात् ४३ याज्यापनयेनापनीतो भक्षः प्रवरवत् ४४ यष्टुर्वा कारणागमात् ४५ प्रवृत्तत्वात्प्रवरस्यानपायः ४६ फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ४७ इज्याविकारो वा संस्कारस्य तदर्थत्वात् ४८ होमात् ४९ चमसैश्च तुल्यकालत्वात् ५० लिङ्गदर्शनाच्च ५१ अनुप्रसर्पिषु सामान्यात् ५२ ब्राह्मणा वा तुल्यशब्दत्वात् ५३

इति पञ्चमः पादः

षष्ठमः पादः

तत्सर्वार्थमप्रकरणात् १ प्रकृतौ वाद्विरुक्तत्वात् २ तद्वर्जं तु वचनम्प्राप्ते ३ दर्शनादिति चेत् ४ न चोदनैकार्थ्यात् ५ उत्पत्तिरिति चेत् ६

न तुल्यत्वात् ७ चोदनार्थकात्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ८ प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् ९ नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् १० इष्ट्यर्थमग्न्याधेयं प्रकरणात् ११ न वा तासां तदर्थत्वात् १२ लिङ्गदर्शनाच्च १३ तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः १४ सर्वार्थं वाधानस्य स्वकालत्वात् १५ तासामग्निः प्रकृतितः प्रयाजवत्स्यात् १६ न वा तासां तदर्थत्वात् १७ तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् १८ स्थानाच्च पूर्वस्य १९ श्वस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था २० तेनोत्कृष्टस्य कालविधिरिति चेत् २१ नैकदेशत्वात् २२ अर्थेनेति चेत् २३ न श्रुतिविप्रतिषेधात् २४ स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् २५ लिङ्गदर्शनाच्च २६ अचोदना गुणार्थेन २७ दोहयोः कालभेदादसंयुक्तं शृतं स्यात् २८ प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् २९ तद्वत्सवनान्तरे ग्रहाम्नानम् ३० रशना च लिङ्गदर्शनात् ३१ आराच्छिष्टमसंयुक्तमितरैः संनिधानात् ३२ संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ३३ निर्देशाद्व्यवतिष्ठेत ३४ अग्न्यङ्गमप्रकरणे तद्वत् ३५ नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ३६ प्रतिनिधिश्च तद्वत् ३७ न तद्वत्प्रयोजनैकत्वात् ३८ अशास्त्रलक्षणत्वात् ३९ नियमार्था गुणश्रुतिः ४० संस्थास्तु समानविधानाः प्रकरणाविशेषात् ४१ व्यपदेशश्च तुल्यवत् ४२ विकारास्तु कामसंयोगे सति नित्यस्य समत्वात् ४३ अपि वा द्विरुक्तत्वात्प्रकृतेर्भविष्यन्तीति ४४ वचनात्तु समुच्चयः ४५ प्रतिषेधाच्च पूर्वलिङ्गानाम् ४६ गुणविशेषादेकस्य व्यपदेशः ४७

इति षष्ठमः पादः

सप्तमः पादः

प्रकरणविशेषादसंयुक्तं प्रधानस्य १ सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् २ आरादपीति चेत् ३ न तद्वाक्यं हि तदर्थत्वात् ४ लिङ्गदर्शनाच्च ५ फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ६ चिकीर्षया च संयोगात् ७ तथाभिधानेन ८ तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ९ गुणाभिधानात्सर्वार्थमभिधानम् १० दीक्षादक्षिणं

तु वचनात्प्रधानस्य ११ निवृत्तिदर्शनाच्च १२ तथा यूपस्य वेदिः १३ देशमात्रं वा शिष्टेनैकवाक्यत्वात् १४ सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम् १५ देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य १६ समाख्यानं च तद्वत् १७ शास्त्रफलं प्रयोक्तरि तल्लक्षण-त्वात्तस्मात्स्वयं प्रयोगे स्यात् १८ उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य तस्मादन्यः स्वयं वा स्यात् १९ अन्यो वा स्यात्परिक्रयाम्ना-नाद्विप्रतिषेधात्प्रत्यगात्मनि २० तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् २१ अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः २२ एकस्य कर्मभेदादिति चेत् २३ नोत्पत्तौ हि २४ चमसाध्वर्यवश्च तैर्व्यपदेशात् २५ उत्पत्तौ बहुश्रुतेः २६ दशत्वं लिङ्गदर्शनात् २७ शमिता च शब्दभेदात् २८ प्रकरणाद्वोत्पत्त्यसंयोगात् २९ उपगाश्च लिङ्गदर्शनात् ३० विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ३१ कर्मकार्यात्सर्वेषामृत्वि-क्त्वमविशेषात् ३२ न वा परिसंख्यानात् ३३ पक्षेणेति चेत् ३४ न सर्वेषामनधिकारः ३५ नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ३६ उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् ३७ स्वामिसप्तदशाः कर्मसा-मान्यात् ३८ ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ३९ तत्संयोगात्कर्मणो व्यवस्था स्यात्संयोगस्यार्थवत्त्वात् ४० तस्योपदे-शसमाख्यानेन निर्देशः ४१ तद्वच्च लिङ्गदर्शनम् ४२ प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ४३ पुरोऽनुवाक्याधिकारो वा प्रैषसंनिधानात् ४४ प्रातरनुवाके च होतृदर्शनात् ४५ चमसांश्चमसाध्वर्यवः समाख्यानात् ४६ अध्वर्युर्वा तन्न्यायत्वात् ४७ चमसे चान्यदर्शनात् ४८ अशक्तौ ते प्रतीयेरन् ४९ वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ५० तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात्सहाङ्गैरव्यक्तः शेषे ५१

इति सप्तमः पादः

अष्टमः पादः

स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् १ वचनादितरेषां स्यात् २ संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्व्यवतिष्ठेरन् ३ याजमानास्तु तत्प्रधानत्वात्कर्मवत् ४ व्यपदेशाच्च ५ गुणत्वे तस्य निर्देशः ६

चोदनां प्रति भावाच्च ७ अतुल्यत्वादसमानविधानाः स्युः ८ तपश्च फलसिद्धित्वाल्लोकवत् ९ वाक्यशेषश्च तद्वत् १० वचनादितरेषां स्यात् ११ गुणत्वाच्च वेदेन न व्यवस्था स्यात् १२ तथा कामोऽर्थसं-योगात् १३ व्यपदेशादितरेषां स्यात् १४ मन्त्राश्चाकर्मकरणास्तद्वत् १५ विप्रयोगे च दर्शनात् १६ द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् १७ ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति १८ यजमाने समाख्यानात्कर्माणि याजमानं स्युः १९ अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् २० विप्रतिषेधे करणः समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात् २१ प्रैषेषु च पराधिकारात् २२ अध्वर्युस्तु दर्शनात् २३ गौणो वा कर्मसामान्यात् २४ ऋृत्विक्फलं करणेष्वर्थवत्त्वात् २५ स्वामिनो वा तदर्थत्वात् २६ लिङ्गदर्शनाच्च २७ कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् २८ व्यपदेशाच्च २९ द्रव्यसंस्कारः प्रकरणाविशेषात्सर्वकर्मणाम् ३० निर्देशात्तु विकृतावपूर्वस्यानधिकारः ३१ विरोधे च श्रुतिविशेषादव्यक्तः शेषे ३२ अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ३३ विकृतौ सर्वार्थः शेषः प्रकृतिवत् ३४ मुख्या-र्थो वाङ्गस्याचोदितत्वात् ३५ संनिधानविशेषादसम्भवे तदङ्गानाम् ३६ आधानेऽपि तथेति चेत् ३७ नाप्रकरणत्वादङ्गस्यातन्निमित्तत्वात् ३८ तत्काले वा लिङ्गदर्शनात् ३९ सर्वेषां वाविशेषात् ४० न्यायोक्ते लिङ्गदर्शनम् ४१ मांसं तु सवनीयानां चोदनाविशेषात् ४२ भक्तिर-संनिधावन्याय्येति चेत् ४३ स्यात्प्रकृतिलिङ्गत्वाद्वैराजवत् ४४

इत्यष्टमः पादः इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः प्रथमः पादः

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा १ यस्मिन्प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाविभक्तत्वात् २ तदुत्सर्गे कर्माणि पुरुषार्थाय शास्त्र-स्यानतिशङ्क्यत्वान्न च द्रव्यं चिकीर्ष्यते तेनार्थे नाभिसम्बन्धात्क्रियायां पुरुषश्रुतिः ३ अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः ४ अपि वा कारणाग्रहणे तदर्थमर्थस्यानभिसम्बन्धात् ५ तथा च लोकभूतेषु ६ द्रव्याणि त्वविशेषेणानर्थक्यात्प्रदीयेरन् ७ स्वेन त्वर्थेन सम्बन्धो

द्रव्याणां पृथगर्थत्वात्तस्माद्यथाश्रुति स्युः ८ चोद्यन्ते चार्थकर्मसु ९ लिङ्गदर्शनाच्च १० तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ११ एकश्रुतित्वाच्च १२ प्रतीयत इति चेत् १३ नाशब्दं तत्प्रमाणत्वात्पूर्ववत् १४ शब्दवत्तूपलभ्यते तदागमे हि तद्दृश्यते तस्य ज्ञानं यथान्येषाम् १५ तद्वच्च लिङ्गदर्शनम् १६ तथा च लिङ्गम् १७ आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत १८ चोदनायां त्वनारम्भोऽविभक्तत्वान्न ह्यन्येन विधीयते १९ स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतताश्रयाद्धि गुणीभावः २० अर्थे समवैषम्यमतो द्रव्यकर्मणाम् २१ एकनिष्पत्तेः सर्वं समं स्यात् २२ संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात् २३ मुख्यशब्दाभिसंस्तवाच्च २४ पदकर्माप्रयोजकं नयनस्य परार्थत्वात् २५ अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात्तदर्थो हि विधीयते २६ पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् २७ एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात् २८ निर्देशात्तस्यान्यदर्थादिति चेत् २९ न शेषसंनिधानात् ३० कर्मकार्यात् ३१ लिङ्गदर्शनाच्च ३२ अभिघारणे विप्रकर्षादनुयाजवत्पात्रभेदः स्यात् ३३ न वापात्रत्वादपात्रत्वं त्वेकदेशत्वात् ३४ हेतुत्वाच्च सहप्रयोगस्य ३५ अभावदर्शनाच्च ३६ सति सव्यवचनम् ३७ न तस्येति चेत् ३८ स्यात्तस्य मुख्यत्वात् ३९ समानयनं तु मुख्यं स्याल्लिङ्गदर्शनात् ३९ वचने हि हेत्वसामर्थ्यम् ४० तत्रोत्पत्तिरविभक्ता स्यात् ४१ तत्र जौहवमनुयाजप्रतिषेधार्थम् ४२ औपभृतं तथेति चेत् ४३ स्याज्जुहूप्रतिषेधान्नित्यानुवादः ४४ तदष्टसंख्यं श्रवणात् ४५ अनुग्रहाच्च जौहवस्य ४६ द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने ४७

इति प्रथमः पादः

द्वितीयः पादः

स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् १ जात्यन्तराच्च शङ्कते २ तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात् ३ शकलश्रुतेश्च ४ प्रतियूपं च दर्शनात् ५ आदाने करोति शब्दः ६ शाखायां तत्प्रधानत्वात् ७ शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्याद्वैषम्यं तत् ८

श्रुत्यपायाच्च ९ हरणे तु जुहोतिर्योगसामान्याद्द्रव्याणां चार्थशेषत्वात् १० प्रतिपत्तिर्वा शब्दस्य तत्प्रधानत्वात् ११ अर्थेऽपीति चेत् १२ न तस्यानधिकारादर्थस्य च कृतत्वात् १३ उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात् १४ संयवनार्थानां वा प्रतिपत्तिरितरासां तत्प्रधानत्वात् १५ प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात् १६ अर्थकर्म वा कर्तृसंयोगात्स्रग्वत् १७ कर्मयुक्ते च दर्शनात् १८ उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात्प्रतिपत्तिः स्यात् १९ सौमिके च कृतार्थत्वात् २० अर्थकर्म वाभिधानसंयोगात् २१ प्रतिपत्तिर्वा तन्न्यायत्वाद्देशार्थावभृथश्रुतिः २२ कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात् २३ नियमार्था वा श्रुतिः २४ तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् २५ संस्कारे च तत्प्रधानत्वात् २६ यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् २७ तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात् २८ विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् २९ अपि वोत्पत्तिसंयोगादर्थसम्बन्धोऽविशिष्टानां प्रयोगैकत्वहेतुः स्यात् ३०

इति द्वितीयः पादः

तृतीयः पादः

द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात् १ उत्पत्तेश्चातत्प्रधानत्वात् २ फलं तु तत्प्रधानायाम् ३ नैमित्तिके विकारत्वात्क्रतुप्रधानमन्यत्स्यात् ४ एकस्य तूभयत्वे संयोगपृथक्त्वम् ५ शेष इति चेत् ६ नार्थपृथक्त्वात् ७ द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यात् ८ पृथक्त्वाद्व्यवतिष्ठेत ९ चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयते १० अपि वाम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्तेऽर्थतोऽप्यसमर्थानामानन्तर्येऽप्यसम्बन्धः तस्माच्छ्रुत्येकदेशः सः ११ वाक्यार्थश्च गुणार्थवत् १२ तत्सर्वार्थमनादेशात् १३ एकं वा चोदनैकत्वात् १४ स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात् १५ प्रत्ययाच्च १६ क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः १७ फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्

१८ अङ्गेषु स्तुतिः परार्थत्वात् १९ काम्ये कर्मणि नित्यः स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः २० वीते च कारणे नियमात् २१ कामो वा तत्संयोगेन चोद्यते २२ अङ्गे गुणत्वात् २३ वीते च नियमस्तदर्थम् २४ सर्वकाम्यमङ्गकामैः प्रकरणात् २५ फलोपदेशो वा प्रधानशब्द-सम्प्रयोगात् २६ तत्र सर्वेऽविशेषात् २७ योगसिद्धिर्वार्थस्योत्पत्त्यसंयोगित्वात् २८ समवाये चोदनासंयोगस्यार्थवत्त्वात् २९ कालश्रुतौ काल इति चेत् ३० नासमवायात्प्रयोजनेन स्यात् ३१ उभयार्थमिति चेत् ३२ न शब्दैकत्वात् ३३ प्रकारणादिति चेत् ३४ नोत्पत्तिसंयोगात् ३५ अनुत्पत्तौ तु कालः स्यात्प्रयोजनेन सम्बन्धात् ३६ उत्पत्तिकालविषये कालः स्याद्वाक्यस्य तत्प्रधानत्वात् ३७ फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ३८ अङ्गानां तूपघातसंयोगो निमित्तार्थः ३९ प्रधाने-नाभिसंयोगादङ्गानां मुख्यकालत्वम् ४० अपवृत्ते तु चोदना तत्सामा-न्यात्स्वकाले स्यात् ४१

इति तृतीयः पादः

चतुर्थः पादः

प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् १ अपि वाङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् २ मध्यस्थं यस्य तन्मध्ये ३ सर्वासां वा समत्वाच्चोदनातः स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ४ प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ५ अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ६ फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ७ दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ८ नित्यश्च ज्येष्ठशब्दात् ९ सार्वरूप्याच्च १० नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसम्बन्धाद्भङ्गि-त्वाच्चान्तरायस्य ११ वैश्वानरश्च नित्यः स्यान्नित्यैः समानसंख्यत्वात् १२ पक्षे वोत्पन्नसंयोगात् १३ षट्चितिः पूर्ववत्त्वात् १४ ताभिश्च तुल्यसंख्यानात् १५ अर्थवादोपपत्तेश्च १६ एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन १७ विप्रतिषेधात्ताभिः समानसंख्यत्वम् १८ पितृयज्ञः स्वकालत्वादनङ्गं स्यात् १९ तुल्यवच्च प्रसंख्यानात् २० प्रतिषिद्धे च दर्शनात् २१ पश्वङ्गं रशना स्यात्तदागमे विधानात् २२

यूपाङ्गं वा तत्संस्कारात् २३ अर्थवादश्च तदर्थवत् २४ स्वरुश्चाप्येक-देशत्वात् २५ निष्क्रयश्च तदङ्गवत् २६ पश्वङ्गं वार्थकर्मत्वात् २७ भक्त्या निष्क्रयवादः स्यात् २८ दर्शपूर्णमासयोरिज्याः प्रधानान्य-विशेषात् २९ अपि वाङ्गानि कानि चिद्येष्वङ्गत्वेन संस्तुतिः सामान्यो ह्यभिसंस्तवः ३० तथा चान्यार्थदर्शनम् ३१ अविशिष्टं तु कारणं प्रधानेषु गुणस्य विद्यमानत्वात् ३२ नानुक्तेऽन्यार्थदर्शनं परार्थत्वात् ३३ पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं यत्फलवत्त्वं तत्संनिधावसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुत-श्चान्यसम्बन्धः ३४ गुणाश्च नामसंयुक्ता विधीयन्ते नाङ्गेषूपपद्यन्ते ३५ तुल्या च कारणश्रुतिरन्यैरङ्गाङ्गिसम्बन्धः ३६ उत्पत्तावभिसम्बन्धस्त-स्मादङ्गोपदेशः स्यात् ३७ तथा चान्यार्थदर्शनम् ३८ ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ३९ गुणानां तूत्पत्तिवाक्येन सम्बन्धात्का-रणश्रुतिस्तस्मात्सोमः प्रधानं स्यात् ४० तथा चान्यार्थदर्शनम् ४१

इति चतुर्थः पादः इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः प्रथमः पादः

श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् १ अर्थाच्च २ अनियमोऽन्यत्र ३ क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ४ अशाब्द इति चेत्स्याद्वाक्यशब्दत्वात् ५ अर्थकृते वानुमानं स्यात्क्रत्वेकत्वे परार्थ-त्वात्स्वेन त्वर्थेन सम्बन्धस्तस्मात्स्वशब्दमुच्येत ६ तथा चान्यार्थदर्श-नम् ७ प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ८ सर्वमिति चेत् ९ नाकृतत्वात् १० क्रत्वन्तरवदिति चेत् ११ नासमवायात् १२ स्थानाच्चोत्पत्तिसंयोगात् १३ मुख्यक्रमेण वाङ्गानां तदर्थत्वात् १४ प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत १५ मन्त्रतस्तु विरोधे स्यात्प्र-योगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः सः १६ तद्वचनाद्विकृतौ यथा प्रधानं स्यात् १७ विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति १८ विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथा शिष्टम् १९ अपि वा क्रमकाल-संयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात्प्रकृतिधर्मलोपः स्यात् २० कालोत्कर्ष इति चेत् २१ न तत्सम्बन्धात् २२ अङ्गानां मुख्यकाल-

त्वाद्यथोक्तमुत्कर्षे स्यात् २३ तदादि वाभिसम्बन्धात्तदन्तमपकर्षे स्यात् २४ प्रवृत्त्या कृतकालानाम् २५ शब्दविप्रतिषेधाच्च २६ असंयोगात्तु वैकृतं तदेव प्रतिकृष्येत २७ प्रासङ्गिकं च नोत्कर्षेदसंयोगात् २८ तथापूर्वम् २९ सांतपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ३० अव्यवायाच्च ३१ असम्बन्धात्तु नोत्कर्षेत् ३२ प्रापणाच्च निमित्तस्य ३३ सम्बन्धात्सवनोत्कर्षः ३४ षोडशी चोक्थ्यसंयोगात् ३५

इति प्रथमः पादः

द्वितीयः पादः

संनिपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् १ सर्वेषां वैकजातीयं कृतानुपूर्व्यत्वात् २ कारणादभ्यावृत्तिः ३ मुष्टिकपाला वदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ४ सर्वाणि त्वेककार्यत्वादेषां तद्गुणत्वात् ५ संयुक्ते तु प्रक्रमात्तदङ्गं स्यादितरस्य तदर्थत्वात् ६ वचनात्तु परिव्याणान्तमञ्जनादि स्यात् ७ कारणाद्वानवसर्गः स्याद्यथा पात्रवृद्धिः ८ न वा शब्दकृतत्वान्न्यायमात्रमितरदर्थात्पात्रविवृद्धिः ९ पशुगणे तस्य तस्यापवर्जयेत्पश्वैकत्वात् १० दैवतैर्वैककर्म्यात् ११ मन्त्रस्य चार्थवत्त्वात् १२ नानाबीजेष्वेकमुलूखलं विभवात् १३ विवृद्धिर्वा नियमानुपूर्व्यस्य तदर्थत्वात् १४ एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् १५ विकारे त्वनूयाजानां पात्रभेदोऽर्थभेदात्स्यात् १६ प्रकृतेः पूर्वो-क्तत्वादपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नानम् १७ मुख्यानन्तर्यमात्रे-यस्तेन तुल्यश्रुतित्वादशब्दत्वात्प्राकृतानां व्यवायः स्यात् १८ अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात् १९ तथा चान्यार्थदर्शनम् २० कृतदेशात्तु पूर्वेषां स देशः स्यात्तेन प्रत्यक्षसंयोगान्न्यायमात्रमितरत् २१ प्रकृताच्च पुरस्ताद्यत् २२ संनिपातश्चेद्यथोक्तमन्ते स्यात् २३

इति द्वितीयः पादः

तृतीयः पादः

विवृद्धिः कर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्येत १ अपि वा सर्व-संख्यत्वाद्विकारः प्रतीयेत २ स्वस्थानात्तु विवृध्येरन्श्चतानुपूर्व्यत्वात्

३ समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् ४ तच्छब्दो वा ५ उष्णिक्ककुभोरन्ते दर्शनात् ६ स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात्पर्यासादागन्तवः स्युस्तथा हि दृष्टं द्वादशाहे ७ पर्यास इति चान्ताख्या ८ अन्ते वा तदुक्तम् ९ वचनात्तु द्वादशाहे १० अतद्विकारश्च ११ तद्विकारेऽप्यपूर्वत्वात् १२ अन्ते तूत्तरयोर्दध्यात् १३ अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् १४ ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः स्यात् १५ क्रत्वग्निशेषो वा चोदितत्वादचोदनानुपूर्वस्य १६ अन्ते स्युरव्यवायात् १७ लिङ्गदर्शनाच्च १८ मध्यमायां तु वचनाद्ब्राह्मणवत्यः १९ प्राग्लोकम्पृणायास्तस्याः सम्पूरणार्थत्वात् २० संस्कृते कर्म संस्काराणां तदर्थत्वात् २१ अनन्तरं व्रतं तद्भूतत्वात् २२ पूर्वं च लिङ्गदर्शनात् २३ अर्थवादो वार्थस्य विद्यमानत्वात् २४ न्यायविप्रतिषेधाच्च २५ संचिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य २६ क्रत्वन्ते वा प्रयोगवचनाभावात् २७ अग्नेः कर्मत्वनिर्देशात् २८ परेणावेदनाद्दीक्षितः स्यात्सर्वैर्दीक्षाभिसम्बन्धात् २९ इष्ट्यन्ते वा तदर्था ह्यविशेषार्थसम्बन्धात् ३० समाख्यानं च तद्वत् ३१ अङ्गवत्क्रतूनामानुपूर्व्यम् ३२ न वासम्बन्धात् ३३ काम्यत्वाच्च ३४ आनर्थक्यान्नेति चेत् ३५ स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ३६ य एतेनेत्यग्निष्टोमः प्रकरणात् ३७ लिङ्गाच्च ३८ अथान्येनेति संस्थानां संनिधानात् ३९ तत्प्रकृतेर्वापत्तिविहारौ हि न तुल्येषूपपद्यते ४० प्रशंसा च विहरणाभावात् ४१ विधिप्रत्ययाद्वा न ह्यकस्मात्प्रशंसा स्यात् ४२ एकस्तोमे वा क्रतुसंयोगात् ४३ सर्वेषां वा चोदनाविशेषात्प्रशंसा स्तोमानाम् ४४

इति तृतीयः पादः

चतुर्थः पादः

क्रमको योऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च १ अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् २ यथाप्रदानं वा तदर्थत्वात् ३ लिङ्गदर्शनाच्च ४ वचनादिष्टिपूर्वत्वम् ५ सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्रातिक्रमवचनात्तदन्तेनानर्थकं हि स्यात् ६ तदर्थवचनाच्च

नाविशेषात्तदर्थत्वम् ७ अयक्ष्यमाणस्य च पवमानहविषां काल-निर्देशादानन्तर्याद्विशङ्का स्यात् ८ इष्टिरयक्ष्यमाणस्य तादर्थ्ये सोम-पूर्वत्वम् ९ उत्कर्षाद्ब्राह्मणस्य सोमः स्यात् १० पौर्णमासी वा श्रुतिसंयोगात् ११ सर्वस्य वैककर्म्यात् १२ स्याद्वा विधिस्तदर्थेन १३ प्रकरणात्तु कालः स्यात् १४ स्वकाले स्यादविप्रतिषेधात् १५ अपनयो वाधानस्य सर्वकालत्वात् १६ पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनात् १७ एकं वा शब्दसामर्थ्यात्प्राक्कृत्स्नविधानात् १८ पुरोडा-शस्त्वनिर्देशे तद्युक्ते देवताभावात् १९ आज्यमपीति चेत् २० न मिश्रदेवतत्वादैन्द्राग्नवत् २१ विकृतेः प्रकृतिकालत्वात्सद्यस्कालोत्तरा विकृतिस्तयोः प्रत्यक्षशिष्टत्वात् २२ द्वैयहकाल्ये तु यथान्यायम् २३ वचनाद्वैककाल्यं स्यात् २४ संनायाग्नीषोमीयविकारा ऊर्ध्वं सोमात्प्रकृतिवत् २५ तथा सोमविकारा दर्शपूर्णमासाभ्याम् २६

इति चतुर्थः पादः इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः प्रथमः पादः

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः १ असाधकं तु तादर्थ्यात् २ प्रत्यर्थं चाभिसंयोगात्कर्मतो ह्यभिसम्बन्धस्तस्मात्कर्मोपदेशः स्यात् ३ फलार्थत्वात्कर्मणः शास्त्रं सर्वाधिकारं स्यात् ४ कर्तुर्वा श्रुति-संयोगाद्विधिः कार्त्स्न्येन गम्यते ५ लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशाय नः ६ तदुक्तित्वाच्च दोषश्रुतिरविज्ञाते ७ जातिं तु बादरायणोऽविशेषा-त्तस्मात्स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ८ चोदितत्वाद्यथाश्रुति ९ द्रव्यवत्त्वात्तु पुंसां स्याद्द्रव्यसंयुक्तं क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात् १० तथा चान्यार्थदर्शनम् ११ तादर्थ्यात्कर्मतादर्थ्यम् १२ फलोत्साहाविशेषात्तु १३ अर्थेन च समवेतत्वात् १४ क्रयस्य धर्ममात्रत्वम् १५ स्ववत्तामपि दर्शयति १६ स्ववतोस्तु वचनादैककर्म्यं स्यात् १७ लिङ्गदर्शनाच्च १८ क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते १९ फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्धः २० फलवत्तां च दर्शयति २१ द्व्याधानं च द्वियज्ञवत् २२ गुणस्य तु विधानत्वात्पत्न्या द्वितीयशब्दः स्यात् २३ तस्या यावदुक्तमाशी-

ब्रह्मचर्यमतुल्यत्वात् २४ चातुर्वर्ण्यमविशेषात् २५ निर्देशाद्वा त्रया-
णां स्यादग्न्याधेयेऽसम्बन्धः क्रतुषु ब्राह्मणश्रुतेरित्यात्रेयः २६ निमित्तार्थेन
बादरिस्तस्मात्सर्वाधिकारं स्यात् २७ अपि वान्यार्थदर्शनाद्यथाश्रुति
प्रतीयेत २८ निर्देशात्तु पक्षे स्यात् २९ वैगुण्यान्नेति चेत् ३० न का-
म्यत्वात् ३१ संस्कारे च तत्प्रधानत्वात् ३२ अपि वा वेदनिर्देशादपशूद्राणां
प्रतीयेत ३३ गुणार्थित्वान्नेति चेत् ३४ संस्कारस्य तदर्थत्वाद्विद्यायां पुरुष-
श्रुतिः ३५ विद्यानिर्देशान्नेति चेत् ३६ अवैद्यत्वादभावः कर्मणि स्यात्
३७ तथा चान्यार्थदर्शनम् ३८ त्रयाणां द्रव्यसम्पन्नः कर्मणो
द्रव्यसिद्धित्वात् ३९ अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः ४०
अङ्गहीनश्च तद्धर्मा ४१ उत्पत्तौ नित्यसंयोगात् ४२ अत्र्यार्षेयस्य हानं
स्यात् ४३ वचनाद्रथकारस्याधानेऽस्य सर्वशेषत्वात् ४४ न्याय्यो वा
कर्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात् ४५ अकर्मत्वात्तु नैवं स्यात् ४६
आनर्थक्यं च संयोगात् ४७ गुणार्थेनेति चेत् ४८ उक्तमनिमित्तत्वम्
४९ सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन् ५० स्थपतिर्निषादः
स्याच्छब्दसामर्थ्यात् ५१ लिङ्गदर्शनाच्च ५२

इति प्रथमः पादः

द्वितीयः पादः

पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यात् १ अपि चोत्पत्तिसं-
योगो यथा स्यात्सत्त्वदर्शनं तथाभावो विभागे स्यात् २ प्रयोगे
पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ३ प्रत्यर्थं श्रुतिभाव इति चेत् ४
तादर्थ्ये न गुणार्थतानुक्तेऽर्थान्तरत्वात्कर्तुः प्रधानभूतत्वात् ५ अपि वा
कामसंयोगे सम्बन्धात्प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषा-
णावत् ६ अन्यस्य स्यादिति चेत् ७ अन्यार्थेनाभिसम्बन्धः ८
फलकामो निमित्तमिति चेत् ९ न नित्यत्वात् १० कर्म तथेति
चेत् ११ न समवायात् १२ प्रक्रमात्तु नियम्येतारम्भस्य क्रिया-
निमित्तत्वात् १३ फलार्थित्वाद्वानियमो यथानुपक्रान्ते १४ नियऽ-
मो वा तन्निमित्तत्वात्कर्तुस्तत्कारणं स्यात् १५ लोके कर्माणि वेदव-
त्ततोऽधिपुरुषज्ञानम् १६ अपराधेऽपि च तैः शास्त्रम् १७ अशास्त्रा

तूपसम्प्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्मादर्थेन गम्येताप्राप्ते शास्त्रमर्थवत् १८ प्रतिषेधेष्वकर्मत्वात्क्रिया स्यात्प्रतिषिद्धानां विभक्तत्वादकर्मणाम् १९ शास्त्राणां त्वर्थवत्वेन पुरुषार्थो विधीयते तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः २० तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन् २१ अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् २२ अभ्यासोऽकर्मशेषत्वात्पुरुषार्थो विधीयते २३ तस्मिन्नसम्भवन्नर्थात् २४ न कालेभ्य उपदिश्यन्ते २५ दर्शनात्काललिङ्गानां कालविधानम् २६ तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत २७ तथा हि लिङ्गदर्शनम् २८ तथान्तःक्रतुप्रयुक्तानि २९ आचाराद्गृह्यमाणेषु तथा स्यात्पुरुषार्थत्वात् ३० ब्राह्मणस्य तु सोम-विद्याप्रजमृणवाक्येन संयोगात् ३१

इति द्वितीयः पादः

तृतीयः पादः

सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात् १ अपि वाप्येकदेशे स्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात् २ तदकर्मणि च दोषस्तस्मात्ततो विशेषः स्यात्प्रधानेनाभिसम्बन्धात् ३ कर्माभेदं तु जैमिनिः प्रयोगवचनैकत्वात्सर्वेषामुपदेशः स्यादिति ४ अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद्यथा क्रत्वन्तरेषु ५ विध्यपराधे च दर्शनात्समाप्तेः ६ प्रायश्चित्तविधानाच्च ७ काम्येषु चैवमर्थित्वात् ८ असंयोगात्तु नैवं स्याद्विधेः शब्दप्रमाणत्वात् ९ अकर्मणि चाप्रत्यवायात् १० क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात् ११ अपि वाव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववत् १२ श्रुतिप्रमाणत्वाच्छिष्टाभावेऽनागमोऽन्यस्याशिष्टत्वा त् १३ क्वचिद्विधानाच्च १४ आगमो वा चोदनार्थाविशेषात् १५ नियमार्थः क्वचिद्विधिः १६ तन्नित्यं तच्चिकीर्षा हि १७ न देवताग्नि-शब्दक्रियमन्यार्थसंयोगात् १८ देवतायां च तदर्थत्वात् १९ प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः २० तथा स्वामिनः फलसमवायात्फलस्य कर्मयोगित्वात् २१ बहूनां तु प्रवृत्तेऽन्यमागमयेद्वैगुण्यात् २२ स स्वा-मी स्यात्तत्संयोगात् २३ कर्मकरो वा भृतत्वात् २४ तस्मिंश्च फलदर्श-

नात् २५ स तद्धर्मा स्यात्कर्मसंयोगात् २६ सामान्यं तच्चिकीर्षा हि २७ निर्देशात्तु विकल्पे यत्प्रवृत्तम् २८ अशब्दमिति चेत् २९ नानङ्गत्वात् ३० वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ३१ न प्रतिनिधौ समत्वात् ३२ स्याच्छ्रुतिलक्षणे नियतत्वात् ३३ न तदीप्सा हि ३४ मुख्याधिगमे मुख्यमागमो हि तदभावात् ३५ प्रवृत्तेऽपीति चेत् ३६ नानर्थकत्वात् ३७ द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ३८ अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ३९ विधिरप्येकदेशे स्यात् ४० अपि वार्थस्यशक्यत्वादेकदेशेन निर्वर्तेतार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात् ४१

इति तृतीयः पादः

चतुर्थः पादः

शेषाद्द्व्यवदाननाशे स्यात्तदर्थत्वात् १ निर्देशाद्वान्यदागमयेत् २ अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात् ३ निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् ४ सर्वैर्वा समवायात्स्यात् ५ निर्देशस्य गुणार्थत्वम् ६ प्रधाने श्रुतिलक्षणम् ७ अर्थवदिति चेत् ८ न चोदनाविरोधात् ९ अर्थसमवायात्प्रायश्चित्तमेकदेशेऽपि १० न त्वशेषे वैगुण्यात्तदर्थं हि ११ स्याद्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हितस्य गुणार्थेनानित्यत्वात् १२ गुणानां च परार्थत्वाद्वचनाद्व्यपाश्रयः स्यात् १३ भेदार्थमिति चेत् १४ न शेषभूतत्वात् १५ अनर्थकश्च सर्वनाशे स्यात् १६ क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात् १७ दर्शनाद्वैकदेशे स्यात् १८ अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः १९ तद्धविः शब्दान्नेति चेत् २० स्यादन्यायत्वादिज्यागामी हविः शब्दस्तल्लिङ्गसंयोगात् २१ यथाश्रुतीति चेत् २२ न तल्लक्षणत्वादुपपातो हि कारणम् २३ होमाभिषवभक्षणं च तद्वत् २४ उभाभ्यां वा न हि तयोर्धर्मशास्त्रम् २५ पुनराधेयमोदनवत् २६ द्रव्योत्पत्तेर्वोभयोः स्यात् २७ पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् २८ चोदना वा द्रव्यदेवताविधेरवाच्ये हि २९ स प्रत्यामनेत्स्थानात् ३० अङ्गविधिर्वा निमित्तसंयोगात् ३१ विश्वजित्त्वप्रवृत्ते भावः कर्मणि स्यात् ३२ निष्क्रयवादाच्च ३३

वत्ससंयोगे व्रतचोदना स्यात् ३४ कालो वोत्पन्नसंयोगाद्यथोक्तस्य ३५ अर्थापरिमाणाच्च ३६ वत्सस्तु श्रुतिसंयोगात्तदङ्गं स्यात् ३७ कालस्तु स्यादचोदना ३८ अनर्थकश्च कर्मसंयोगे ३९ अवचनाच्च स्वशब्दस्य ४० कालश्चेत्संनयत्पक्षे तल्लिङ्गसंयोगात् ४१ कालार्थ-त्वाद्वोभयोः प्रतीयेत ४२ प्रस्तरे शाखाश्रयणवत् ४३ कालविधि-र्वोभयोर्विद्यमानत्वात् ४४ अतत्संस्कारार्थत्वाच्च ४५ तस्माच्च विप्र-योगे स्यात् ४६ उपवेषश्च पक्षे स्यात् ४७

इति चतुर्थः पादः

पञ्चमः पादः

अभ्युदये कालापराधादिज्याचोदना स्याद्यथा पञ्चशरावे १ अपनयो वा विद्यमानत्वात् २ तद्रूपत्वाच्च शब्दानाम् ३ आतञ्चनाभ्यासस्य दर्शनात् ४ अपूर्वत्वाद्विधानं स्यात् ५ पयोदोषात्पञ्चशरावेऽदुष्टं हीतरत् ६ संनाय्येऽपि तथेति चेत् ७ न तस्यादुष्टत्वादविशिष्टं हि कारणम् ८ लक्षणार्था शृतश्रुतिः ९ उपांशुयाजेऽवचनाद्यथाप्रकृति १० अपनयो वा प्रवृत्त्या यथेतरेषाम् ११ निरुप्ते स्यात्तत्संयोगात् १२ प्रवृत्ते वा प्रापणान्निमित्तस्य १३ लक्षणमात्रमितरत् १४ तथा चान्यार्थदर्शनम् १५ अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्म-रथ्यस्तण्डुलभूतेष्वपनयात् १६ व्यूर्ध्वभाग्भ्यस्त्वालेखनस्तत्कारित्वा-द्देवतापनयस्य १७ विनिरुप्ते न मुष्टीनामपनयस्तद्गुणत्वात् १८ अप्राकृतेन हि संयोगस्तत्स्थानीयत्वात् १९ अभावाच्चेतरस्य स्यात् २० सांनाय्यसंयोगान्नासंनयतः स्यात् २१ औषधसंयोगाद्वोभयोः २२ वैगुण्यान्नेति चेत् २३ नातत्संस्कारत्वात् २४ साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् २५ प्रवृत्ते वा प्रापणान्निमित्तस्य २६ आदेशार्थेतरा श्रुतिः २७ दीक्षापरिमाणे यथाकाम्यविशेषात् २८ द्वादशाहस्तु लिङ्गात्स्यात् २९ पौर्णमास्यामनियमोऽविशेषात् ३० आनन्तर्यात्तु चैत्री स्यात् ३१ माघी वैकाष्टकाश्रुतेः ३२ अन्या अपीति चेत् ३३ न भक्तित्वादेषा हि लोके ३४ दीक्षापराधे चानुग्रहात् ३५ उत्थाने चानुप्ररोहात् ३६ अस्यां च सर्वलिङ्गानि ३७ दीक्षा-

कालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् ३८ उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ३९ तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ४० कालप्राधान्याच्च ४१ प्रतिषेधाच्चो-र्ध्वमवभृथादिष्टेः ४२ प्रतिहोमश्चेत्सायमग्निहोत्रप्रभृतीनि हूयेरन् ४३ प्रातस्तु षोडशिनि ४४ प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ४५ प्रकरणे वा शब्दहेतुत्वात् ४६ अतद्विकारश्च ४७ व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत्प्रतीयेत ४८ विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ४९ स्याद्वा प्राप्तनि मित्तत्वात्कालमात्रमेकम् ५० तत्र विप्रतिषेधाद्विकल्पः स्यात् ५१ प्रयोगान्तरे वोभयानुग्रहः स्यात् ५२ न चैकसंयोगात् ५३ पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ५४ यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्याद्यथेतरस्मिन् ५५ अहर्गणे यस्मिन्नपच्छेदस्तदावर्तेत कर्मपृथ-क्त्वात् ५६

इति पञ्चमः पादः

षष्ठमः पादः

संनिपाते वैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन् १ वचनाद्वाशिरोवत्स्यात् २ न वानारभ्यवादत्वात् ३ स्याद्वा यज्ञार्थत्वादौदुम्बरीवत् ४ न तत्प्रधानत्वात् ५ औदुम्बर्याः परार्थत्वात्कपालवत् ६ अन्येनापीति चेत् ७ नैकत्वात्तस्य चानधिकाराच्छब्दस्य चाविभक्तत्वात् ८ संनिपातात्तु निमित्तविघातः स्याद्बृहद्रथन्तरवद्विभक्तशिष्टत्वाद्वसिष्ठनिर्वर्त्ये ९ अपि वा कृत्स्नसंयोगादविघातः प्रतीयेत स्वामित्वेनाभिसम्बन्धात् १० साम्नोः कर्मवृद्ध्यैकदेशेन संयोगे गुणत्वेनाभिसम्बन्धस्तस्मात्तत्र विघातः स्यात् ११ वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणिवत् १२ अर्थाभावात्तु नैवं स्यात् १३ अर्थानां च विभक्तत्वान्न तच्छ्रुतेन सम्बन्धः १४ पाणेः प्रत्यङ्गभावादसम्बन्धः प्रतीयेत १५ सत्राणि सर्ववर्णानामविशेषात् १६ लिङ्गदर्शनाच्च १७ ब्राह्मणानां वेतरयोरार्त्विज्याभावात् १८ वचना-दिति चेत् १९ न स्वामित्वं हि विधीयते २० गार्हपते वा स्यातामविप्रति-षेधात् २१ न वा कल्पविरोधात् २२ स्वामित्वादितरेषामहीने लिङ्गदर्शनम् २३ वासिष्ठानां वा ब्रह्मत्वनियमात् २४ सर्वेषां वा

प्रतिप्रसवात् २५ विश्वामित्रस्य हौत्रनियमाद्भृगुशुनकवसिष्ठानामनधिकारः २६ विहारस्य प्रभुत्वादनग्नीनामपि स्यात् २७ सारस्वते च दर्शनात् २८ प्रायश्चित्तविधानाच्च २९ साग्नीनां वेष्टिपूर्वत्वात् ३० स्वार्थेन च प्रयुक्तत्वात् ३१ संनिवापं च दर्शयति ३२ जुह्वादीनामप्रयुक्तत्वात्संदेहे यथाकामी प्रतीयेत ३३ अपि वान्यानि पात्राणि साधारणानि कुर्वीरन्विप्रतिषेधाच्छास्त्रकृतत्वात् ३४ प्रायश्चित्तमापदि स्यात् ३५ पुरुषकल्पेन वा विकृतौ कर्तृनियमः स्याद्यज्ञस्य तद्गुणत्वादभावादितरान्प्रत्येकस्मिन्नधिकारः स्यात् ३६ लिङ्गाच्चेज्याविशेषवत् ३७ न वा संयोगपृथक्त्वाद्गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ३८ इज्यायां तद्गुणत्वाद्विशेषेण नियम्येत ३९

इति षष्ठमः पादः

सप्तमः पादः

स्वदाने सर्वमविशेषात् १ यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् २ न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वात् ३ अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ४ नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ५ शूद्रश्च धर्मशास्त्रत्वात् ६ दक्षिणाकाले यत्स्वं तत्प्रतीयेत तद्दानसंयोगात् ७ अशेषत्वात्तदन्तः स्यात्कर्मणो द्रव्यसिद्धित्वात् ८ अपि वा शेषकर्म स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ९ तथा चान्यार्थदर्शनम् १० अशेषं तु समञ्जसादानेन शेषकर्म स्यात् ११ नादानस्यानित्यत्वात् १२ दीक्षासु तु विनिर्देशादक्रत्वर्थेन संयोगस्तस्मादविरोधः स्यात् १३ अहर्गणे च तद्धर्मः स्यात्सर्वेषामविशेषात् १४ द्वादशशतं वा प्रकृतिवत् १५ अतद्गुणत्वान्नैवं स्यात् १६ लिङ्गदर्शनाच्च १७ विकारः सन्नुभयतोऽविशेषात् १८ अधिकं वा प्रतिप्रसवात् १९ अनुग्रहाच्च पादवत् २० अपरिमिते शिष्टस्य संख्याप्रतिषेधस्तच्छ्रुतित्वात् २१ कल्पान्तरं वा तुल्यवत्प्रसंख्यानात् २२ अनियमोऽविशेषात् २३ अधिकं वा स्याद्बह्वर्थत्वादितरैः संनिधानात् २४ अर्थवादश्च तदर्थवत् २५ परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् २६ तद्युक्ते च प्रतिषेधात् २७ निर्देशाद्वा तद्धर्मः स्यात्पञ्चावत्तवत् २८ विधौ तु

वेदसंयोगादुपदेशः स्यात् २९ अर्थवादो वा विधिशेषत्वात्तस्मान्नित्या-
नुवादः स्यात् ३० सहस्त्रसंवत्सरं तदायुषामसम्भवान्मनुष्येषु ३१ अपि
वा तदधिकारान्मनुष्यधर्मः स्यात् ३२ नासामर्थ्यात् ३३ सम्बन्धा-
दर्शनात् ३४ स कुलकल्पः स्यादिति कार्ष्णाजिनिरेकस्मिन्नसम्भवात्
३५ अपि वा कृत्स्नसंयोगादेकस्यैव प्रयोगः स्यात् ३६ विप्रतिषेधात्तु
गुणयन्यतरः स्यादिति लाबुकायनः ३७ संवत्सरो विचालित्वात् ३८
सा प्रकृतिः स्यादधिकारात् ३९ अहानि वाभिसंख्यत्वात् ४०

इति सप्तमः पादः

अष्टमः पादः

इष्टिपूर्वत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु स्यादपूर्वोऽप्याधानस्य
सर्वशेषत्वात् १ इष्टित्वेन तु संस्तवश्चतुर्होतृनसंस्कृतेषु दर्शयति २
उपदेशस्त्वपूर्वत्वात् ३ स सर्वेषामविशेषात् ४ अपि वा क्र
त्वभावादनाहिताग्नेरशेषभूतनिर्देशः ५ जपो वानग्निसंयोगात् ६
इष्टित्वेन तु संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्य-
त्वात् ७ उभयोः पितृयज्ञवत् ८ निर्देशो वानाहिताग्नेरनारभ्या-
ग्निसंयोगात् ९ पितृयज्ञे संयुक्तस्य पुनर्वचनम् १० उपनयन्नादधीत
होमसंयोगात् ११ स्थपतीष्टिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात्
१२ आधानं च भार्यासंयुक्तम् १३ अकर्म चोर्ध्वमाधानात्तत्समवायो
हि कर्मभिः १४ श्राद्धवदिति चेत् १५ न श्रुतिविप्रतिषेधात् १६
सर्वार्थत्वाच्च पुत्रार्थो न प्रयोजयेत् १७ सोमपानात्तु प्रापणं द्वितीयस्य
तस्मादुपयच्छेत् १८ पितृयज्ञे तु दर्शनात्प्रागाधानात्प्रतीयेत १९
स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत २० अपि
वा लौकिकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् २१ अवकीर्णिपशुश्च
तद्वदाधानस्याप्राप्तकालत्वात् २२ उदगयनपूर्वपक्षाहः पुणयाहेषु दैवानि
स्मृतिरूपान्यार्थदर्शनात् २३ अहनि च कर्मसाकल्यम् २४ इतरेषु
तु पित्र्याणि २५ याच्ञाक्रयणमविद्यमाने लोकवत् २६ नियतं
वार्थवत्त्वात्स्यात् २७ तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम् २८ अनर्थकं
त्वनित्यं स्यात् २९ पशुचोदनायामनियमोऽविशेषात् ३० छागो वा

मन्त्रवर्णात् ३१ न चोदनाविरोधात् ३२ आर्षेयवदिति चेत् ३३ न तत्र ह्यचोदितत्वात् ३४ नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात् ३५ अनियमो वार्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ३६ न वा प्रयोगसमवायित्वात् ३७ रूपाल्लिङ्गाच्च ३८ छागे न कर्माख्या रूपलिङ्गाभ्याम् ३९ रूपान्यत्वान्न जातिशब्दः स्यात् ४० विकारो नौत्पत्तिकत्वात् ४१ स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ४२ जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ४३

इत्यष्टमः पादः इति षष्ठोऽध्यायः

सप्तमोऽध्यायः प्रथमः पादः

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् १ उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् २ चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ३ सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ४ अविभागात्तु नैवं स्यात् ५ द्व्यर्थत्वं च विप्रतिषिद्धम् ६ उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्ततश्च कर्मभेदः स्यात् ७ यदि वाप्यभिधानवत्सामान्यात्सर्वधर्मः स्यात् ८ अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्द-भाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ९ स्मृतिरिति चेत् १० न पूर्ववत्त्वात् ११ अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्दादेवान्यत्र भावः स्यात् १२ सामाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् १३ श्येनस्येति चेत् १४ नासंनिधानात् १५ अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्यौतिष्टोमिकाद्विधेस्तद्वाचकं समानं स्यात् १६ पञ्चसंचरेष्वर्थवादातिदेशः संनिधानात् १७ सर्वस्य वैकशब्द्यात् १८ लिङ्गदर्शनाच्च १९ विहिताम्नानान्नेति चेत् २० नेतरार्थत्वात् २१ एककपालैन्द्राग्नौ च तद्वत् २२ एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे सर्वहोमापरिवृत्तिदर्शनादवभृथे च सकृद्द्व्यवदानस्य वचनात् २३

इति प्रथमः पादः

द्वितीयः पादः

साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टम् १ शब्दैस्त्वर्थविधित्वा दर्थान्तरेऽप्रवृत्तिः स्यात्पृथग्भावात्क्रियाया ह्यभिसम्बन्धः २ स्वार्थे वा स्यात्प्रयोजनं क्रियायास्तदङ्गभावेनोपदिश्येरन् ३ शब्दमात्रमिति चेत् ४ नौत्पत्तिकत्वात् ५ शास्त्रं चैवमनर्थकं स्यात् ६ स्वरस्येति चेत् ७ नार्थाभावाच्छ्रुतेरसम्बन्धः ८ स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभक्तत्वात् ९ लिङ्गदर्शनाच्च १० अश्रुतेस्तु विकारस्योत्तरासु यथाश्रुति ११ शब्दानां चासामञ्जस्यम् १२ अपि तु कर्मशब्दः स्याद्भावोऽर्थः प्रसिद्धग्रहणत्वाद्विकारो ह्यविशिष्टोऽन्यैः १३ अद्रव्यं चापि दृश्यते १४ तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वादर्थो ह्यासामलौकिको विधानात् १५ तस्मिन्संज्ञाविशेषाः स्युर्विकारपृथक्त्वात् १६ योनिशस्याश्च तुल्यवदितराभिर्विधीयन्ते १७ अयोनौ चापि दृश्यतेऽतथायोनि १८ एकार्थ्ये नास्ति वैरूप्यमिति चेत् १९ स्यादर्थान्तरेष्वनिष्पत्तेर्यथा पाके २० शब्दानां च सामञ्जस्यम् २१

इति द्वितीयः पादः

तृतीयः पादः

उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् १ अपूर्वे वापि भागित्वात् २ नाम्नस्त्वौत्पत्तिकत्वात् ३ प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावेऽप्रसिद्धं स्यात् ४ अपि वा सत्रकर्मणि गुणार्थैषा श्रुतिः स्यात् ५ विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज्ज्यौतिष्टोमिकानि पृष्ठान्यस्ति च पृष्ठशब्दः ६ षडाहाद्वा तत्र हि चोदनाः ७ लिङ्गाच्च ८ उत्पन्नाधिकारो ज्योतिष्टोमः ९ द्वयोर्विधिरिति चेत् १० न व्यर्थत्वात्सर्वशब्दस्य ११ तथावभृथः सोमात् १२ प्रकृतेरिति चेत् १३ न भक्तित्वात् १४ लिङ्गदर्शनाच्च १५ द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् १६ गुणविधिस्तु न गृह्णीयात्समत्वात् १७ निर्मन्थ्यादिषु चैवम् १८ प्रणयनन्तु सौमिकम-वाच्यं हीतरत् १९ उत्तरवेदिप्रतिषेधश्च तद्वत् २० प्राकृतं वानामत्वात् २१ परिसंख्यार्थं श्रवणं गुणार्थमर्थवादो वा २२ प्रथमोत्तमयोः प्रणय-

नमुत्तरवेदिप्रतिषेधात् २३ मध्यमयोर्वा गत्यर्थवादात् २४ श्रौत्तर-वेदिकोऽनारभ्यवादप्रतिषेधः २५ स्वरसामैककपालामिक्षं च लिङ्ग-दर्शनात् २६ चोदनासामान्याद्वा २७ कर्मजे कर्म यूपवत् रूपं वाशेषभूतत्वात् २८ विशये लौकिकः स्यात्सर्वार्थत्वात् २९ न वैदिकमर्थनिर्देशात् ३० तथोत्पत्तिरितरेषां समत्वात् ३१ संस्कृतं स्यात्तच्छब्दत्वात् ३२ भक्त्या वायज्ञशेषत्वाद्गुणानामभिधानत्वात् ३३ कर्मणः पृष्ठशब्दः स्यात्तथाभूतोपदेशात् ३४ अभिधानोपदेशाद्वा वि-प्रतिषेधाद्द्रव्येषु पृष्ठशब्दः स्यात् ३५

इति तृतीयः पादः

चतुर्थः पादः

इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम् १ स लौकिकः स्याद्दृष्टप्रवृत्ति-त्वात् २ वचनात्तु ततोऽन्यत्वम् ३ लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ४ अपि वान्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः ५ मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ६ भागित्वात्तु नियम्येत गुणानामभिधानत्वात्सम्बन्धादभिधानवद्यथा धेनुः किशोरेण ७ उत्पत्तीनां समत्वाद्वा यथाधिकारं भावः स्यात् ८ उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ९ विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनम् १० लिङ्गहेतुत्वादलिङ्गे लौकिकं स्यात् ११ लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन १२ द्वादशाहिकमहर्गणे तत्प्रकृतित्वादैकाहिकम-धिकागमात्तदाख्यं स्यादेकाहवत् १३ लिङ्गाच्च १४ न वा क्रत्व-भिधानादधिकानामशब्दत्वम् १५ लिङ्गं संघातधर्मः स्यात्तदर्थापत्ते-र्द्रव्यवत् १६ न वार्थधर्मत्वात्संघातस्य गुणत्वात् १७ अर्थापत्तेर्द्रव्येषु धर्मलाभः स्यात् १८ प्रवृत्त्या नियतस्य लिङ्गदर्शनम् १९ विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् २०

इति चतुर्थः पादः इति सप्तमोऽध्यायः

अष्टमोऽध्यायः प्रथमः पादः

अथ विशेषलक्षणम् १ यस्य लिङ्गमर्थसंयोगादभिधानवत् २ प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ३ लिङ्गदर्शनाच्च ४ कृत्स्नविधानाद्वापूर्वत्वम् ५ स्रुगभिधारणाभावस्य च नित्यानुवादात् ६ विधिरिति चेत् ७ न वाक्यशेषत्वात् ८ शङ्कते चानुपोषणात् ९ दर्शनमैष्टिकानां स्यात् १० इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ११ पशौ च लिङ्गदर्शनात् १२ दैक्षस्य चेतरेषु १३ ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात् १४ तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशुयूपदर्शनात् १५ अव्यक्तासु तु सोमस्य १६ गुणेषु द्वादशाहस्य १७ गव्यस्य च तदादिषु १८ निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् १९ कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात् २० प्रवृत्तौ चापि तादर्थ्यात् २१ अश्रुतित्वाच्च २२ गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् २३ निवृत्तिर्वा कर्मभेदात् २४ अपि वातद्विकारत्वात्क्रत्वर्थत्वात्प्रवृत्तिः स्यात् २५ एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् २६ लिङ्गसाधारण्याद्विकल्पः स्यात् २७ ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो हि २८ अश्रुतित्वान्नेति चेत् २९ स्याल्लिङ्गभावात् ३० तथा चान्यार्थदर्शनम् ३१ विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ३२ तेन च कर्मसंयोगात् ३३ गुणत्वेन देवताश्रुतिः ३४ हिरण्यमाज्यधर्मस्तेजस्त्वात् ३५ धर्मानुग्रहाच्च ३६ औषधं वा विशदत्वात् ३७ चरुशब्दाच्च ३८ तस्मिंश्च श्रपणश्रुतेः ३९ मधूदके द्रव्यसामान्यात्पयोविकारः स्यात् ४० आज्यं वा वर्णसामान्यात् ४१ धर्मानुग्रहाच्च ४२ पूर्वस्य चाविशिष्टत्वात् ४३

इति प्रथमः पादः

द्वितीयः पादः

वाजिने सोमपूर्वत्वं सौत्रामण्याञ्च ग्रहेषु ताच्छब्द्यात् १ अनुवषट्काराच्च २ समुपहूय भक्षणाच्च ३ क्रयणश्रपणपुरोरुगुपयामग्रहणासादनवासोपनहनञ्च तद्वत् ४ हविषा वा नियम्येत तद्विकारत्वात् ५ प्रशंसा सोमशब्दः ६ वचनानीतराणि ७ व्यपदेशश्च तद्वत् ८ पशु-

पुरोडाशस्य च लिङ्गदर्शनम् ९ पशुः पुरोडाशविकारः स्याद्देवता-सामान्यात् १० प्रोक्षणाच्च ११ पर्य्याग्निकरणाच्च १२ सांनाय्यं वा तत्प्रभवत्वात् १३ तस्य च पात्रदर्शनात् १४ दध्नः स्यान्मूर्त्तिसामान्यात् १५ पयो वा कालसामान्यात् १६ पश्वानन्तर्यात् १७ द्रवत्वं चा-विशिष्टम् १८ आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् १९ एकं वा चोदनैकत्वात् २० दधिसंघातसामान्यात् २१ पयो वा तत्प्र-धानत्वाल्लोकवद्दध्नस्तदर्थत्वात् २२ धर्मानुग्रहाच्च २३ सत्रमही-नश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरैककर्म्यात् २४ अपि वा यजति-श्रुतेरहीनभूतप्रवृत्तिः स्यात्प्रकृत्या तुल्य शब्दत्वात् २५ द्विरात्रादी-नामेकादशरात्रादहीनत्वं यजतिचोदनात् २६ त्रयोदशरात्रादिषु सत्र-भूतस्तेष्वासनोपायिचोदनात् २७ लिङ्गाच्च २८ अन्यतरतोऽतिरात्र-त्वात्पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वस्य दर्शनात् २९ अहीनवचनाच्च ३० सत्रे वोपायिचोदनात् ३१ सत्र-लिङ्गञ्च दर्शयति ३२

इति द्वितीयः पादः

तृतीयः पादः

हविर्गणे परमुत्तरस्य देशसामान्यात् १ देवतया वा नियम्येत शब्द-वत्त्वादितरस्याश्रुतित्वात् २ गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ३ नानाहानि वा संघातत्वात्प्रवृत्तिलिङ्गेन चोदनात् ४ तथा चान्यार्थदर्शनम् ५ कालाभ्यासेऽपि बादरिः कर्मभेदात् ६ तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसंख्यत्वात् ७ संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात् ८ अधिकाराद्वा प्रकृतिस्तद्विशिष्टा स्याद-भिधानस्य तन्निमित्तत्वात् ९ गणादुपचयस्तत्प्रकृतित्वात् १० एका-हाद्वा तेषां समत्वात्स्यात् ११ गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्यधि कारात्संख्यात्वादग्निष्टोमवदव्यतिरेकात्तदाख्यत्वम् १२ तन्नित्यवच्च प्रथक्सतीषु तद्वचनम् १३ न विंशतौ दशेति चेत् १४ ऐकसंख्य-मेव स्यात् १५ गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात् १६ गो-त्ववच्च समन्वयः १७ संख्यायाश्च शब्दत्वात् १८ इतरस्याश्रुतित्वाच्च

१९ द्रव्यान्तरेऽनिवेशादुक्थ्यलोपैर्विशिष्टं स्यात् २० अशास्त्रलक्षणत्वाच्च २१ उत्पत्तिनामधेयत्वाद्भक्तया पृथक्सतीषु स्यात् २२ वचनमिति चेत् २३ यावदुक्तम् २४ अपूर्वे च विकल्पः स्याद्यदि संख्याविधानम् २५ ऋग्गुणत्वान्नेति चेत् २६ तथा पूर्ववति स्यात् २७ गुणावेशश्च सर्वत्र २८ निष्पन्नग्रहणान्नेति चेत् २९ तथेहापि स्यात् ३० यदि वाविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धः स्यात् ३१ दृष्टः प्रयोग इति चेत् ३२ तथा शरेष्वपि ३३ भक्तयेति चेत् ३४ तथेतरस्मिन् ३५ अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ३६

इति तृतीयः पादः

चतुर्थः पादः

दर्विहोमो यज्ञाभिधानं होमसंयोगात् १ स लौकिकानां स्यात्कर्तुस्तदाख्यत्वात् २ सर्वेषां वा दर्शनाद्वास्तुहोमे ३ जुहोतिचोदनानां वा तत्संयोगात् ४ द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ५ न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ६ दर्शनाच्चान्यपात्रस्य ७ तथाग्निहविषोः ८ उक्तश्चार्थसम्बन्धः ९ तस्मिन्सोमः प्रवर्तेताव्यक्तत्वात् १० न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशात्तन्त्रे तेन विप्रतिषेधात् ११ शब्दान्तरत्वात् १२ लिङ्गदर्शनाच्च १३ उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिलिङ्गदर्शनात्पशुवत् १४ अनुत्तरार्थौ वार्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् १५ न प्रकृतावपीति चेत् १६ उक्तं समवाये पारदौर्बल्यम् १७ तच्चोदना वेष्टेः प्रवृत्तित्वाद्विधिः स्यात् १८ शब्दसामर्थ्याच्च १९ लिङ्गदर्शनाच्च २० तत्राभावस्य हेतुत्वाद्गुणार्थे स्याददर्शनम् २१ विधिरिति चेत् २२ न वाक्यशेषत्वाद्गुणार्थे च समाधानं नानात्वेनोपपद्यते २३ येषां वापरयोर्होमस्तेषां स्यादविरोधात् २४ तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् २५ लिङ्गाद्वा शेषहोमयोः २६ प्रतिपत्ती तु ते भवतस्तस्मादतद्विकारत्वम् २७ संनिपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद्वचनादतिदेशः स्यात् २८

इति चतुर्थः पादः इत्यष्टमोऽध्यायः

नवमोऽध्यायः प्रथमः पादः

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थ-त्वात् १ संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् २ तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ३ फलदेवतयोश्च ४ न चोदनातो हि ताद्गुण्यम् ५ देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ६ अर्थापत्या च ७ ततश्च तेन सम्बन्धः ८ अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः ९ अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् १० द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात् ११ अर्थकारिते च द्रव्येण न व्यवस्था स्यात् १२ अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् १३ अपूर्वत्वाद्व्यवस्था स्यात् १४ तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् १५ तद्युक्तस्येति चेत् १६ नाश्रुतित्वात् १७ अधिकारादिति चेत् १८ तुल्येषु नाधिकारः स्यादचोदितश्च सम्बन्धः पृथक्सतां यज्ञार्थेनाभिसम्बन्धस्तस्माद्यज्ञप्रयोजनम् १९ देशबद्धमु-पांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावात् २० यज्ञस्य वा तत्संयोगात् २१ अनुवादश्च तदर्थवत् २२ प्रणीतादि तथेति चेत् २३ न यज्ञस्याश्रुतित्वात् २४ तद्देशानां वा संघातस्याचोदितत्वात् २५ अग्निधर्मः प्रतीष्टकं संघातात्पौर्णमासीवत् २६ अग्नेर्वा स्याद्द्रव्यै-कत्वादितरासां तदर्थत्वात् २७ चोदनासमुदायात्तु पौर्णमास्यां तथा स्यात् २८ पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् २९ लिङ्गाद्वा प्रा-गुत्तमात् ३० अनुवादो वा दीक्षा यथा नक्तं संस्थापनस्य ३१ स्या-द्वानारभ्य विधानादन्ते लिङ्गविरोधात् ३२ अभ्यासः सामिधेनीनां प्राथम्यात्स्थानधर्मः स्यात् ३३ इष्ट्यावृतौ प्रयाजवदावर्तेतारम्भणीया ३४ सकृद्वारम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ३५ अर्था-भिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात् ३६ ततश्चावचनं तेषामितरार्थं प्रयुज्यते ३७ गुणशब्दस्तथेति चेत् ३८ न समवायात् ३९ चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ४०

विकारस्तत्प्रधाने स्यात् ४१ असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ४२ कर्माभावादेवमिति चेत् ४३ न परार्थत्वात् ४४ लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ४५ पश्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ४६ विशेषो वा तदर्थनिर्देशात् ४७ पशुत्वं चैकशब्द्यात् ४८ यथोक्तं वा संनिधानात् ४९ आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ५० द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पः स्यात् ५१ उपदेशाच्च साम्नः ५२ नियमो वा श्रुतिविशेषादितरत्साप्तदश्यवत् ५३ अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ५४ यत्स्थाने वा तद्गीतिः स्यात्पदान्यत्वप्रधानत्वात् ५५ गानसंयोगाच्च ५६ वचनमिति चेत् ५७ न तत्प्रधानत्वात् ५८

इति प्रथमः पादः

द्वितीयः पादः

सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् १ तदुक्तदोषम् २ कर्म वा विधिलक्षणम् ३ तादृग्द्रव्यं वचनात्पाकयज्ञवत् ४ तत्राविप्रतिषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ५ शब्दार्थत्वात्तु नैवं स्यात् ६ परार्थत्वाच्च शब्दानाम् ७ असम्बन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ८ संस्कारश्चाप्रकरणेऽग्निवत्स्यात्प्रयुक्तत्वात् ९ अकार्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत १० आश्रितत्वाच्च ११ प्रयुज्यत इति चेत् १२ ग्रहणार्थं प्रयुज्येत १३ तृचे स्याच्छ्रुतिनिर्देशात् १४ शब्दार्थत्वाद्विकारस्य १५ दर्शयति च १६ वाक्यानां तु विभक्तत्वात्प्रतिशब्दं समाप्तिः स्यात्संस्कारस्य तदर्थत्वात् १७ तथा चान्यार्थदर्शनम् १८ अनवानोपदेशश्च तद्वत् १९ अभ्यासेनेतरा श्रुतिः २० तदभ्यासः समासु स्यात् २१ लिङ्गदर्शनाच्च २२ नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत २३ ऐकार्थ्याच्च तदभ्यासः २४ प्रागाथिकं तु २५ स्वे च २६ प्रगाथे च २७ लिङ्गदर्शनाव्यतिरेकाच्च २८ अर्थैकत्वाद्विकल्पः स्यात् २९ अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ३० वचनाद्विनियोगः स्यात् ३१ सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात् ३२ वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात् ३३ स्तोभस्यैके द्रव्यान्तरे

निवृत्तिमृग्वत् ३४ सर्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात् ३५ अन्वयञ्चापि दर्शयति ३६ निवृत्तिर्वार्थलोपात् ३७ अन्वयो वार्थवादः स्यात् ३८ अधिकञ्च विवर्णञ्च जैमिनिः स्तोभशब्दत्वात् ३९ धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ४० तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात्स्यात् ४१ आवेश्येरन् वार्थवत्त्वात्संस्कारस्य तदर्थत्वात् ४२ आख्या चैवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् ४३ परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ४४ क्रियेरन्वार्थनिर्वृत्तेः ४५ एकार्थत्वादविभागः स्यात् ४६ निर्देशाद्वा व्यवतिष्ठेरन् ४७ अप्राकृते तद्विकाराद्विरोधाद्व्यवतिष्ठेरन् ४८ उभयसाम्नि चैवमेकार्थापत्तेः ४९ स्वार्थत्वाद्वा व्यवस्था स्यात्प्रकृतिवत् ५० पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात्तदभीज्या हि ५१ काल-स्येति चेत् ५२ नाप्रकरणत्वात् ५३ मन्त्रवर्णाच्च ५४ तदभावेऽग्निवदिति चेत् ५५ नाधिकारिकत्वात् ५६ उभयोरविशेषात् ५७ यदभीज्या वा तद्विषयौ ५८ प्रयाजेऽपीति चेत् ५९ नाचोदितत्वात् ६०

इति द्वितीयः पादः

तृतीयः पादः

प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्यत्वात् १ लिङ्गदर्शनाच्च २ जातिनैमित्तिकं यथास्थानम् ३ अविकारमेकेऽनार्षत्वात् ४ लिङ्गदर्शनाच्च ५ विकारो वा तदुक्तहेतुः ६ लिङ्गं मन्त्रचिकीर्षार्थम् ७ नियमो वोभयभागित्वात् ८ लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ९ अन्-यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्च तेनास्य १० विकारो वा तदर्थत्वात् ११ अपि त्वन्यायसम्बन्धात्प्रकृतिवत्परेष्वपि यथार्थं स्यात् १२ यथार्थं त्वन्यायस्याचोदितत्वात् १३ छन्दसि तु यथादृष्टम् १४ विप्रतिपत्तौ विकल्पः स्यात्समत्वाद्गुणे त्वन्यायकल्पनैकदेशत्वात् १५ प्रकरणविशेषाच्च १६ अर्थाभावात्तु नैवं स्याद्गुणमात्रमितरत् १७ द्यावोस्तथेति चेत् १८ नोत्पत्तिशब्दत्वात् १९ अपूर्वे त्वविकारो-ऽप्रदेशात्प्रतीयेत २० विकृतौ चापि तद्वचनात् २१ अध्रिगुः सवनी-

येषु तद्वत्समानविधानाश्चेत् २२ प्रतिनिधौ चाविकारात् २३ अनाम्ना-नादशब्दत्वमभावाच्चेतरस्य स्यात् २४ तादर्थ्याद्वा तदाख्यं स्यात्सं-स्कारैरविशिष्टत्वात् २५ उक्तञ्च तत्त्वमस्य २६ संसर्गिषु चार्थ-स्यास्थितपरिमाणत्वात् २७ लिङ्गदर्शनाच्च २८ एकधेत्येकसंयोगा-दभ्यासेनाभिधानं स्यात् २९ अविकारो वा बहूनामेककर्मवत् ३० सकृत्त्वं चैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेन विवृद्धावभिधानं स्यात् ३१ मेधपतित्वं स्वामिदेवतस्य समवायात्स-र्वत्र च प्रयुक्तत्वात्तस्य चान्यायनिगदत्वात्सर्वत्रैवाविकारः स्यात् ३२ अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ३३ स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्पत्न्यां द्वितीयशब्दः स्यात् ३४ देवता तु तदाशीष्ट्वात्सम्प्राप्तत्वात्स्वामिन्यनर्थिका स्यात् ३५ उत्सर्गाच्च भक्त्या तस्मिन्पतित्वं स्यात् ३६ उत्कृष्येतैकसंयुक्तो द्विदेवते सम्भवात् ३७ एकस्तु समवायात्तस्य तल्लक्षणत्वात् ३८ संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ३९ एकत्वेऽपि गुणानपायात् ४० नियमो बहुदेवते विकारः स्यात् ४१ विकल्पो वा प्रकृतिवत् ४२ अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिसमवायात्स्यात् ४३

इति तृतीयः पादः

चतुर्थः पादः

षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्येनाभिसम्बन्धो विकारान्न समासः स्यादसंयोगाच्च सर्वाभिः १ अभ्यासेऽपि तथेति चेत् २ न गुणादर्थकृतत्वाच्च ३ समासेऽपि तथेति चेत् ४ नासम्भवात् ५ स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ६ वङ्क्रीणान्तु प्रधानत्वात्समासेनाभिधानं स्यात्प्राधान्यमध्रिगोस्तदर्थ-त्वात् ७ तासां च कृत्स्नवचनात् ८ अपि त्वसंनिपातित्वात्पत्नीवदा-म्नातेनाभिधानं स्यात् ९ विकारस्तु प्रदेशत्वाद्यजमानवत् १० अपूर्व-त्वात्तथा पत्न्याम् ११ अनाम्नातस्त्वविकारात्संख्यासु सर्वगामि-त्वात् १२ संख्या त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम् १३ अनाम्ना-तवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः १४ अभ्यासो वावि-

कारात्स्यात् १५ पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात्तस्मात् समासशब्दः स्यात् १६ अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् १७ तत्प्रतिषिद्ध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् १८ ऋग्वा स्यादाम्नातत्वादविकल्पश्च न्याय्यः १९ तस्यां तु वचनादैरवत्पदविकारः स्यात् २० सर्वप्रतिषेधो वासंयोगात्पदेन स्यात् २१ वनिष्ठुसंनिधा-नादुरूकेण वपाभिधानम् २२ प्रशसास्याभिधानम् २३ बाहुप्रशंसा वा २४ श्येनशलाकश्यपकवषस्त्रेकपर्णोष्वाकृतिवचनं प्रसिद्धसंनिधानात् २५ कार्त्स्न्यं वा स्यात्तथाभावात् २६ अध्रिगोश्च तदर्थत्वात् २७ प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात्तदर्थे हि विधीयते २८ धारणे च परार्थत्वात् २९ क्रियार्थत्वादितरेषु कर्म स्यात् ३० न तूत्पन्ने यस्य चोदनाप्राप्तकालत्वात् ३१ प्रदानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात्सं-सर्गाच्च मधूदकवत् ३२ संस्कारप्रतिषेधश्च तद्वत् ३३ तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ३४ अधर्मत्वमप्रदानात्प्रणीतार्थे विधानादतुल्य-त्वादसंसर्गः ३५ परो नित्यानुवादः स्यात् ३६ विहितप्रतिषेधो वा ३७ वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात्स्यात्कारणात्केवलाशनम् ३८ व्रतधर्माच्च लेपवत् ३९ रसप्रतिषेधो वा पुरुषधर्मत्वात् ४० अभ्युदये दोहापनयः स्वधर्मा स्यात्प्रवृत्तत्वात् ४१ शृतोपदेशाच्च ४२ अपनयो वार्थान्तरे विधानाच्चरुपयोवत् ४३ लक्षणार्था शृतश्रुतिः ४४ श्रयणानां त्वपूर्वत्वात्प्रदानार्थे विधानं स्यात् ४५ गुणो वा श्रयणार्थत्वात् ४६ अनिर्देशाच्च ४७ श्रुतेश्च तत्प्रधानत्वात् ४८ अर्थवादश्च तदर्थवत् ४९ संस्कारं प्रति भावाच्च तस्मादप्यप्रधानं स्यात् ५० पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ५१ शेषप्रतिषेधो वार्थाभावादिडान्तवत् ५२ पूर्वत्वाच्च शब्दस्य संस्थापयतीति चाप्रवृत्तेनोपपद्यते ५३ प्रवृत्तेर्यज्ञहे तुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात्तत्कारितत्वाद्यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ५४ क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ५५ आज्यसंस्थाप्रतिनिधिः स्याद्द्रव्योत्सर्गात् ५६ समाप्तिवचनात् ५७ चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् ५८ अनिज्यां च वनस्पतेः प्रसिद्धां तेन दर्शयति ५९ संस्था तद्देवतत्वात्स्यात् ५९

इति चतुर्थः पादः इति नवमोऽध्यायः

दशमोऽध्यायः प्रथमः पादः

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् १ अपि वाभिधानसं-स्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् २ तेषामप्रत्यक्षविशिष्टत्वात् ३ इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारम्भस्य प्रधानसंयोगात् ४ प्रधानाच्चान्यसंयुक्तात्सर्वारम्भान्निवर्तेतानङ्गत्वात् ५ तस्यां तु स्यात्प्रयाजवत् ६ न वाङ्गभूतत्वात् ७ एकवाक्यत्वाच्च ८ कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ९ स्थाणौ तु देशमात्रत्वादनि-वृत्तिः प्रतीयेत १० अपि वा शेषभूतत्वात्संस्कारः प्रतीयेत ११ समा-ख्यानं च तद्वत् १२ मन्त्रवर्णश्च तद्वत् १३ प्रयाजे च तन्न्यायत्वात् १४ लिङ्गदर्शनाच्च १५ तथाज्यभागाग्निरपीति चेत् १६ व्यपदेशाद्देवता-न्तरम् १७ समत्वाच्च १८ पशावपीति चेत् १९ न तद्भूतवचनात् २० लिङ्गदर्शनाच्च २१ गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च २२ अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात् २३ व्यृद्धवचनञ्च विप्रतिपत्तौ तदर्थत्वात् २४ गुणेऽपीति चेत् २५ नासंहानात्कपालवत् २६ ग्रहाणाञ्च सम्प्रतिपत्तौ तद्वचनं तदर्थत्वात् २७ ग्रहाभावे च तद्वचनम् २८ देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति २९ अविरुद्धोपपत्तिरर्थापत्तेः शृतवद्भूतविकारः स्यात् ३० स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद्विप्रतिपत्तौ तादर्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम् ३१ विप्रतिपत्तौ तासामाख्याविकारः स्यात् ३२ अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ३३ चरुर्हविर्विकारः स्यादिज्यासंयोगात् ३४ प्रसिद्धग्रहणत्वाच्च ३५ ओदनो वान्नसंयोगात् ३६ न द्व्यर्थत्वात् ३७ कपालविकारो वा विशयेऽर्थोपपत्तिभ्याम् ३८ गुणमुख्यविशेषाच्च ३९ तच्छ्रुतौ चान्यहविष्ट्वात् ४० लिङ्गदर्शनाच्च ४१ ओदनो वा प्रयुक्तत्वात् ४२ अपूर्वव्यपदेशाच्च ४३ तथा च लिङ्गदर्शनम् ४४ स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ४५ एकस्मिन्वाविप्रतिषेधात् ४६ न वार्थान्तरसंयोगादपूपे पाकसंयुक्तं धारणार्थं चरौ भवति तत्रार्थात्पात्रलाभः स्यादनियमोऽविशेषात् ४७ चरौ वा लिङ्गदर्शनात् ४८ तस्मिन्पेषणमनर्थलोपात्स्यात् ४९ अक्रिया वापूपहेतुत्वात् ५० पिण्डार्थत्वाच्च संयवनम् ५१ संवपनञ्च तादर्थ्यात्

५२ संतापनमधःश्रपणात् ५३ उपधानं च तादर्थ्यात् ५४ पृथुश्लक्ष्णे वानपूपत्वात् ५५ अभ्यूहश्चोपरिपाकार्थत्वात् ५६ तथावज्वलनम् ५७ व्युद्धृत्यासादनं च प्रकृतावश्रुतित्वात् ५८

इति प्रथमः पादः

द्वितीयः पादः

कृष्णलेष्वर्थलोपादपाकः स्यात् १ स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् २ उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ३ क्रियेत वार्थ-वादत्वात्तयोः संसर्गहेतुत्वात् ४ अकर्म वा चतुर्भिराप्तिवचनात्सह पूर्णं पुनश्चतुरवत्तम् ५ क्रिया वा मुख्यावदानपरिमाणात्सामान्या-त्तद्गुणत्वम् ६ तेषां चैकावदानत्वात् ७ आप्तिः संख्या समानत्वात् ८ सतोस्त्वाप्तिवचनं व्यर्थम् ९ विकल्पस्त्वेकावदानत्वात् १० सर्वविकारे त्वभ्यासानर्थक्यं हविषो हीतरस्य स्यादपि वा स्विष्टकृतः स्यादितरस्यान्याय्यत्वात् ११ अकर्म वा संसर्गार्थनिवृत्तित्वात्तस्मा-दाप्तिसमर्थत्वम् १२ भक्षाणां तु प्रीत्यर्थत्वादकर्म स्यात् १३ स्याद्वा निर्धानदर्शनात् १४ वचनं वाज्यभक्षस्य प्रकृतौ स्यादभागित्वात् १५ वचनं वा हिरण्यस्य प्रदानवदाज्यस्य गुणभूतत्वात् १६ एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहतत्वात् १७ सर्वत्वं च तेषामधिकारात्स्यात् १८ पुरुषापनयो वा तेषामवाच्यत्वात् १९ पुरुषापनयात्स्वकालत्वम् २० एकार्थत्वादविभागः स्यात् २१ ऋत्विग्दानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् २२ परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् २३ दक्षिणायुक्तवचनाच्च २४ न चान्येनानम्येत परिक्रयात्कर्मणः परार्थत्वात् २५ परिक्रीतवचनाच्च २६ सनिवन्येव भृतिवचनात् २७ नैष्कर्तृकेण संस्तवाच्च २८ शेषभक्षाश्च तद्वत् २९ संस्कारो वा द्रव्यस्य परार्थत्वात् ३० शेषे च समत्वात् ३१ स्वामिनि च दर्शनात्तत्सामान्यादितरेषां तथात्वम् ३२ तथा चान्यार्थदर्शनम् ३३ वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात् ३४ परिक्रयश्च तादर्थ्यात् ३५ प्रतिषेधश्च कर्मवत् ३६ स्याद्वा प्रासर्पिकस्य धर्म-मात्रत्वात् ३७ न दक्षिणाशब्दात्तस्मान्नित्यानुवादः स्यात् ३८ उदव-

सानीयः सत्रधर्मा स्यात्तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात् ३९ न त्वेतत्प्रकृतित्वाद्विभक्तचोदितत्वाच्च ४० तेषां तु वचनाद्द्वियज्ञवत्सहप्रयोगः स्यात् ४१ तत्रान्यानृत्विजो वृणीरन् ४२ एकैकशस्त्वविप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ४३ कामेष्टौ च दानशब्दात् ४४ वचनं वा सत्रत्वात् ४५ द्वेष्ये चाचोदनाद्दक्षिणापनयः स्यात् ४६ अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ४७ यावदुक्तमुपयोगः स्यात् ४८ यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ४९ क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ५० काम्यानि तु न विद्यन्ते कामाज्ञानाद्यथेतरस्यानुच्यमानानि ५१ ईहार्थाश्चाभावात्सूक्तवाकवत् ५२ स्युर्वार्थवादत्वात् ५३ नेच्छाभिधानात्तदभावादितरस्मिन् ५४ स्युर्वा होतृकामाः ५५ न तदाशीष्ट्वात् ५६ सर्वस्वारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ५७ स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ५८ गते कर्मास्थियज्ञवत् ५९ जीवत्यवचनमायुराशिषस्तदर्थत्वात् ६० वचनं वा भागित्वात्प्राग्यथोक्तात् ६१ क्रिया स्याद्धर्ममात्राणाम् ६२ गुणलोपे च मुख्यस्य ६३ मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात्स्यात् ६४ न निर्वापशेषत्वात् ६५ संख्या तु चोदनां प्रति सामान्यात्तद्विकारः संयोगाच्च परं मुष्टेः ६६ न चोदनाभिसम्बन्धात्प्रकृतौ संस्कारयोगात् ६७ औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात् ६८ नैमित्तिके तु कार्यत्वात्प्रकृतेः स्यात्तदापत्तेः ६९ विप्रतिषेधे तद्वचनात्प्राकृतगुणलोपः स्यात्तेन च कर्मसंयोगात् ७० परेषां प्रतिषेधः स्यात् ७१ प्रतिषेधाच्च ७२ अर्थाभावे संस्कारत्वं स्यात् ७३ अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ७४

इति द्वितीयः पादः

तृतीयः पादः

विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिः संनिधानात् १ प्रकृतिवत्तस्य चानुपरोधः २ चोदनाप्रभुत्वाच्च ३ प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात्सर्वो हि पूर्ववान्विधिरविशेषात् प्रवर्तितः ४ न चाङ्गविधिरनङ्गे स्यात् ५ कर्मणश्चैकशब्द्यात्संनिधाने

विधेराख्यासंयोगो गुणेन तद्विकारः स्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ६ अकार्यत्वाच्च नाम्नः ७ तुल्या च प्रभुता गुणे ८ सर्वमेवं प्रधानमिति चेत् ९ तथाभूतेन संयोगाद्यथार्थविधयः स्युः १० विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणायोगात्तस्मात्सर्वं प्रधानार्थम् ११ समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् १२ हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् १३ प्रकृत्यनुपरोधाच्च १४ उत्तरस्य वा मन्त्रार्थित्वात् १५ विध्यतिदेशात्तच्छ्रुतौ विकारः स्याद्गुणानामुपदेश्यत्वात् १६ पूर्वस्मिंश्चामन्त्रत्वदर्शनात् १७ संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् १८ प्रकृत्यनुपरोधाच्च १९ विधेस्तु तत्र भावात्संदेहे यस्य शब्दस्तदर्थः स्यात् २० संस्कारसामर्थ्याद्गुणसंयोगाच्च २१ विप्रतिषेधात्क्रियाप्रकरणे स्यात् २२ षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् २३ अभ्यासात्तु प्रधानस्य २४ आवृत्त्या मन्त्रकर्म स्यात् २५ अपि वा प्रतिमन्त्रत्वात्प्राकृतानामहानिः स्यादन्यायश्च कृतेऽभ्यासः २६ पौर्वापर्यञ्चाभ्यासे नोपपद्यते नैमित्तिकत्वात् २७ तत्पृथक्त्वं च दर्शयति २८ न चाविशेषाद्व्यपदेशः स्यात् २९ अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ३० शिष्टत्वाच्चेतरासां यथास्थानम् ३१ विकारस्त्वप्रकरणे हि काम्यानि ३२ शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ३३ वासो वत्सञ्च सामान्यात् ३४ अर्थापत्तेस्तद्धर्मा स्यान्निमित्ताख्याभिसंयोगात् ३५ दाने पाकोऽर्थलक्षणः ३६ पाकस्य चान्नकारित्वात् ३७ तथाभिघारणस्य ३८ द्रव्यविधिसंनिधौ संख्या तेषां गुणत्वात्स्यात् ३९ समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ४० यस्य वा संनिधाने स्याद्वाक्यतो ह्यभिसम्बन्धः ४१ असंयुक्तास्तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारः स्यात् ४२ असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्याकोपात्क्रतोः ४३ शब्दार्थश्चापि लोकवत् ४४ सा पशूनामुत्पत्तितो विभागात् ४५ अनियमोऽविशेषात् ४६ भागित्वाद्वा गवां स्यात् ४७ प्रत्ययात् ४८ लिङ्गदर्शनाच्च ४९ तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ५० परिक्रयाच्च लोकवत् ५१ विभागं चापि दर्शयति ५२ समं स्यादश्रुतित्वात् ५३ अपि वा कर्मवैषम्यात् ५४

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाभ्युदये ५५ तस्य धेनुरिति गवां प्रकृतौ विभक्त-चोदितत्वात्सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन ५६ सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तस्मात्समवायाद्धि कर्मभिः ५७ चोदनानामनाश्रयाल्लिङ्गेन नि-यमः स्यात् ५८ एका पञ्चेति धेनुवत् ५९ त्रिवत्सश्च ६० तथा च लिङ्गदर्शनम् ६१ एके तु श्रुतिभूतत्वात्संख्यया गवां लिङ्गविशेषेण ६२ प्राकाशौ तथेति चेत् ६३ अपि त्ववयवार्थत्वाद्विभक्तप्रकृति-त्वाद्गुणेदन्ताविकारः स्यात् ६४ धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ६५ एके तु कर्तृसंयोगात्स्रग्वत्तस्य लि-ङ्गविशेषेण ६६ अपि वा तदधिकाराद्धिरण्यवद्विकारः स्यात् ६७ तथा च सोमचमसः ६८ सर्वविकारो वा क्रत्वर्थे प्रतिषेधात्पशूनां ६९ ब्रह्मदानेऽविशिष्टमिति चेत् ७० उत्सर्गस्य क्रत्वर्थत्वात्प्रतिषिद्धस्य कर्म स्यान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ७१ यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ७२ सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ७३ यजुर्युक्ते त्वध्वर्योर्दक्षिणा विकारः स्यात् ७४ अपि वा श्रुतिभूतत्वात्सर्वासां तस्य भागो नियम्यते ७५

इति तृतीयः पादः

चतुर्थः पादः

प्रकृतिलिङ्गासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् १ चोदना-लिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् २ सर्वत्र तु ग्रहाम्नानमधिकं स्यात्प्रकृतिवत् ३ अधिकैश्चैकवाक्यत्वात् ४ लिङ्गदर्शनाच्च ५ प्राजापत्येषु चाम्नानात् ६ आमने लिङ्गदर्शनात् ७ उपगेषु शरवत्स्यात्प्रकृतिलिङ्गसंयोगात् ८ आनर्थक्यात्त्वधिकं स्यात् ९ संस्कारे चान्यसंयोगात् १० प्रयाजवदिति चेत् ११ नार्थान्यत्वात् १२ आच्छादने त्वैकार्थ्यात्प्राश्चतस्य विकारः स्यात् १३ अधिकं वान्यार्थत्वात् १४ समुच्चयं च दर्शयति १५ सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत १६ अर्थे त्वश्रूयमाणे शेषत्वा-

त्प्राश्चतस्य विकारः स्यात् १७ सर्वेषामविशेषात् १८ एकस्य वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् १९ स्तोमविवृद्धौ त्वधिकं स्यादविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च २० पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् २१ वचनानि त्वपूर्वत्वात् २२ विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना २३ शेषाणां चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते २४ तथोत्तरस्यां ततौ तत्प्रकृतित्वात् २५ प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् २६ अविकारो वार्थशब्दानपायात्स्याद्द्रव्यवत् २७ तथारम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् २८ द्रव्येष्वारम्भगामित्वादर्थे विकारः सामर्थ्यात् २९ बुधन्वान्पवमानवद्विशेषनिर्देशात् ३० मन्त्रविशेषनिर्देशान्न देवताविकारः स्यात् ३१ विधिनिगमभेदात्प्रकृतौ तत्प्रकृतित्वाद्विकृतावपि भेदः स्यात् ३२ यथोक्तं वा विप्रतिपत्तेर्न चोदना ३३ स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्तेत ३४ संयोगो वार्थापत्तेरभिधानस्य कर्मजत्वात् ३५ सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात् ३६ सर्वस्य वैककर्म्यात् ३७ स्विष्टकृदावापिकोऽनुयाजे स्यात्प्रयोजनवदङ्गानामर्थसंयोगात् ३८ अन्वाहेति च शस्त्रवत्कर्म स्याच्चोदनान्तरात् ३९ संस्कारो वा चोदितस्य शब्दस्य वचनार्थत्वात् ४० स्याद्गुणार्थत्वात् ४१ मनोतायां तु वचनादविकारः स्यात् ४२ पृष्ठार्थेऽन्यद्रथन्तरात्तद्योनिपूर्वत्वादृचां प्रविभक्तत्वात् ४३ स्वयोनौ वा सर्वाख्यत्वात् ४४ यूपवदिति चेत् ४५ न कर्मसंयोगात् ४६ कार्यत्वादुत्तरयोर्यथाप्रकृति ४७ समानदेवते वा तृचस्याविभागात् ४८ ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ४९ उभयपानात्पृषदाज्ये दध्नः स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ५० न वा परार्थत्वाद्यज्ञपतिवत् ५१ स्याद्वावाहनस्य तादर्थ्यात् ५२ न वा संस्कारशब्दत्वात् ५३ स्याद्वा द्रव्याभिधानात् ५४ दध्नस्तु गुणभूतत्वादाज्यपानिगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ५५ दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ५६ अपि वाज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ५७ अपि वाख्याविकारत्वात्तेन स्यादुपलक्षणम्

५८ न वा स्याद्गुणशास्त्रत्वात् ५९
इति चतुर्थः पादः

पञ्चमः पादः

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् १ लिङ्गदर्श-
नाच्च २ विकल्पो वा समत्वात् ३ क्रमादुपजनोऽन्ते स्यात् ४
लिङ्गमविशिष्टं संख्याया हि तद्वचनम् ५ आदितो वा प्रवृत्तिः
स्यादारम्भस्य तदादित्वाद्वचनादन्त्यविधिः स्यात् ६ एकत्रिके तृचा-
दिषु माध्यन्दिने छंदसां श्रुतिभूतत्वात् ७ आदितो वा तन्न्यायत्वा-
दितरस्यानुमानिकत्वात् ८ यथानिवेशञ्च प्रकृतिवत्संख्यामात्रवि-
कारत्वात् ९ त्रिकस्तृचे धुर्ये स्यात् १० एकस्यां वा स्तोम-
स्यावृत्तिधर्मत्वात् ११ चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात्
१२ प्राप्तिस्तु रात्रिशब्दसम्बन्धात् १३ अपूर्वासु तु संख्यासु विकल्पः
स्यात्सर्वासामर्थवत्त्वात् १४ स्तोमविवृद्धौ प्राकृतानामभ्यासेन सं-
ख्यापूरणमविकारात्संख्यायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् १५
आगमेन वाभ्यासस्याश्रुतित्वात् १६ संख्यायाश्च पृथक्त्वनिवेशात्
१७ पराक्शब्दत्वात् १८ उक्ताविकाराच्च १९ अश्रुतित्वान्नेति चेत्
२० स्यादर्थचोदितानां परिमाणशास्त्रम् २१ आवापवचनं वाभ्यासे
नोपपद्यते २२ साम्नां चोत्पत्तिसामर्थ्यात् २३ धूर्येष्वपीति चेत्
२४ नावृत्तिधर्मत्वात् २५ बहिष्पवमाने तु ऋगागमः सामैकत्वात्
२६ अभ्यासेन तु संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात् २७
अविशेषान्नेति चेत् २८ स्यात्तद्धर्मत्वात्प्रकृतिवदभ्यस्येतासंख्यापूरणात्
२९ यावदुक्तं वा कृतपरिमाणत्वात् ३० अधिकानाञ्च दर्शनात् ३१
कर्मस्वपीति चेत् ३२ न चोदितत्वात् ३३ षोडशिनो वैकृतत्वं तत्र
कृत्स्नविधानात् ३४ प्रकृतौ चाभावदर्शनात् ३५ अयज्ञवचनाच्च
३६ प्रकृतौ वा शिष्टत्वात् ३७ प्रकृतिदर्शनाच्च ३८ आम्नातं परिसं-
ख्यार्थम् ३९ उक्तमभावदर्शनम् ४० गुणादयज्ञत्वम् ४१ तस्या-
ग्रयणाद्ग्रहणम् ४२ उक्थ्याच्च वचनात् ४३ तृतीयसवने वचना-
त्स्यात् ४४ अनभ्यासे पराक्शब्दस्य तादर्थ्यात् ४५ उक्थ्यविच्छे-

दवचनत्वाच्च ४६ आग्रयणाद्वा पराक्शब्दस्य देशवाचित्वात्पुनरा-
धेयवत् ४७ विच्छेदः स्तोमसामान्यात् ४८ उक्थ्याग्निष्टोमसंयो-
गादस्तुतशस्त्रः स्यात्सति हि संस्थान्यत्वम् ४९ संस्तुतशस्त्रो वा
तदङ्गत्वात् ५० लिङ्गदर्शनाच्च ५१ वचनात्संस्थान्यत्वम् ५२
अभावादतिरात्रेषु गृह्यते ५३ अन्वयो वानारभ्यविधानात् ५४
चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत् ५५
अपि वा संख्यावत्त्वान्नानाहीनेषु गृह्यते पक्षवदेकस्मिन्संख्यार्थभावात्
५६ भोजने तत्संख्यं स्यात् ५७ जगत्साम्नि सामाभावादृक्तः
सामतदाख्यं स्यात् ५८ उभयसाम्नि नैमित्तिकं विकल्पेन समत्वा-
त्स्यात् ५९ मुख्येन वा नियम्येत ६० निमित्तविघाताद्वा क्रतुयुक्तस्य
कर्म स्यात् ६१ ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ६२
अपि वा धर्माविशेषात्तद्धर्माणां स्वस्थाने प्रकरणादग्रत्वमुच्यते ६३
धारासंयोगाच्च ६४ कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात्
६५ तद्देशानां वाग्रसंयोगात्तद्युक्तं कामशास्त्रं स्यान्नित्यसंयोगात् ६६
परेषु चाग्रशब्दः पूर्ववत्स्यात्तदादिषु ६७ प्रतिकर्षो वा नित्यार्थेना-
ग्रस्य तदसंयोगात् ६८ प्रतिकर्षञ्च दर्शयति ६९ पुरस्तादैन्द्रवायव-
स्याग्रस्य कृतदेशत्वात् ७० तुल्यधर्मत्वाच्च ७१ तथा च लिङ्गदर्शनम्
७२ सादनं चापि शेषत्वात् ७३ लिङ्गदर्शनाच्च ७४ प्रदानं चापि
सादनवत् ७५ न वा प्रधानत्वाच्छेषत्वात्सादनं तथा ७६ त्र्यनी-
कायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ७७ अपि वाहर्गणेष्वग्नि-
वत्समानविधानं स्यात् ७८ द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत्समा-
नविधानं स्यात् ७९ व्यूढो वा लिङ्गदर्शनात्समूढविकारः स्यात्
८० कामसंयोगात् ८१ तस्योभयथा प्रवृत्तिरैककर्म्यात् ८२ एका-
दशिनीवत्त्र्यनीका परिवृत्तिः स्यात् ८३ स्वस्थानविवृद्धिर्वाह्नाम-
प्रत्यक्षसंख्यत्वात् ८४ पृष्ठ्यावृत्तौ चाग्रयणस्य दर्शनात्त्रयस्त्रिंशे
परिवृत्तौ पुनरैन्द्रवायवः स्यात् ८५ वचनात्परिवृत्तिरैकादशिनेषु ८६
लिङ्गदर्शनाच्च ८७ छन्दोव्यतिक्रमाद्व्यूढे भक्षपवमानपरिधिकपालस्य
मन्त्राणां यथोत्पत्तिवचनमूहवत्स्यात् ८८

इति पञ्चमः पादः

षष्ठमः पादः

एकर्चस्थानि यज्ञे स्युः स्वाध्यायवत् १ तृचे वा लिङ्गदर्शनात् २ स्वर्दृशं प्रतिवीक्षणं कालमात्रं परार्थत्वात् ३ पृष्ठ्यस्य युगपद्विधेरेकाहवद्द्विसामत्वात् ४ विभक्ते वा समस्तविधानात्तद्विभागे विप्रतिषिद्धम् ५ समासस्त्वेकादशिनेषु तत्प्रकृतित्वात् ६ विहारप्रतिषेधाच्च ७ श्रुतितो वा लोकवद्विभागः स्यात् ८ विहारप्रकृतित्वाच्च ९ विशये च तदासत्तेः १० त्रयस्तथेति चेत् ११ न समत्वात्प्रयाजवत् १२ सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात् १३ विधेस्तु विप्रकर्षः स्यात् १४ वैरूपसामा क्रतुसंयोगात्त्रिवृद्वदेकसामा स्यात् १५ पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् १६ त्रिवृद्वदिति चेत् १७ न प्रकृतावकृत्स्नसंयोगात् १८ विधित्वान्नेति चेत् १९ स्याद्विशये तन्न्यायत्वात्कर्माविभागात् २० प्रकृतेश्चाविकारात् २१ त्रिवृति संख्यात्वेन सर्वसंख्याविकारः स्यात् २२ स्तोमस्य वा तल्लिङ्गत्वात् २३ उभयसाम्नि विश्वजिद्वद्विभागः स्यात् २४ पृष्ठार्थे वातदर्थत्वात् २५ लिङ्गदर्शनाच्च २६ पृष्ठे रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशेऽहनि स्यात्तदानन्तर्यात्प्रकृतिवत् २७ अन्ते वा कृतकालत्वात् २८ अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् २९ अन्ते वा कृतकालत्वात् ३० आवृत्तिस्तु व्यवाये कालभेदात्स्यात् ३१ मधु न दीक्षिता ब्रह्मचारित्वात् ३२ प्राश्येत वा यज्ञार्थत्वात् ३३ मानसमहरन्तरं स्याद्भेदव्यपदेशात् ३४ तेन च संस्तवात् ३५ अहरन्ताच्च परेण चोदना ३६ पक्षे संख्या सहस्रवत् ३७ अहरङ्गं वांशुवच्चोदनाभावात् ३८ दशमविसर्गवचनाच्च ३९ दशमेऽहनीति च तद्गुणशास्त्रात् ४० संख्यासामञ्जस्यात् ४१ पश्चतिरेके चैकस्य भावात् ४२ स्तुतिव्यपदेशमङ्गेन विप्रतिषिद्धं व्रतवत् ४३ वचनादतदन्तत्वम् ४४ सत्रमेकः प्रकृतिवत् ४५ वचनात्तु बहूनां स्यात् ४६ अपदेशः स्यादिति चेत् ४७ नैकव्यपदेशात् ४८ संनिवापं च दर्शयति ४९ बहूनामिति चैकस्मिन्विशेषवचनं व्यर्थम् ५० अन्ये स्युर्ऋत्विजः प्रकृतिवत् ५१ अपि वा यजमानाः स्युऋर्त्विजामभिधानसंयोगात्तेषां स्याद्यजमानत्वम् ५२ कर्तृसंस्कारो वचनादाधातृ-

वदिति चेत् ५३ स्याद्विशये तन्न्यायत्वात्प्रकृतिवत् ५४ स्वाम्या-ख्याः स्युर्गृहपतिवदिति चेत् ५५ न प्रसिद्धग्रहणत्वादसंयुक्तस्य तद्धर्मेण ५६ बहूनामिति च तुल्येषु विशेषवचनं नोपपद्यते ५७ दीक्षितादीक्षितव्यपदेशश्च नोपपद्यतेऽर्थयोर्नित्यभावित्वात् ५८ अदक्षि-णत्वाच्च ५९ द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् ६० यजतिचोदनादहीनत्वं स्वामिनां चा-स्थितपरिमाणत्वात् ६१ अहीने दक्षिणाशास्त्रं गुणत्वात्प्रत्यहं कर्म-भेदः स्यात् ६२ सर्वस्य वैककर्म्यात् ६३ पृषदाज्यवद्वाह्नां गुणशास्त्रं स्यात् ६४ ज्यौतिष्टोम्यस्तु दक्षिणाः सर्वासामेककर्मत्वात्प्रकृतिवत्त-स्मान्नासां विकारः स्यात् ६५ द्वादशाहे तु वचनात्प्रत्यहं दक्षिणाभेद-स्तत्प्रकृतित्वात्परेषु तासां संख्याविकारः स्यात् ६६ परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ६७ भेदस्तु गुणसंयोगात् ६८ प्रत्यहं सर्वसंस्कारः प्रकृतिवत्सर्वासां सर्वशेषत्वात् ६९ एकार्थत्वान्ने-ति चेत् ७० स्यादुत्पत्तौ कालभेदात् ७१ विभज्य तु संस्कारवचनाद्द्वा-दशाहवत् ७१ लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिङ्गस्य सर्वगामित्वादाग्नेयवत् ७२ यावदर्थे वार्थशेषत्वादल्पेन परिमाणं स्यात्तस्मिंश्च लिङ्गसामर्थ्यम् ७३ आग्नेये कृत्स्नविधिः ७४ ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिः स्यात् ७५ वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात् ७६ तत्राहर्गणेऽर्थाद्वासः प्रक्लृप्तिः स्यात् ७७ मानं प्रत्युत्पादयेत्प्रकृतौ तेन दर्शनादुपावहरणस्य ७८ हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ७९

इति षष्ठमः पादः

सप्तमः पादः

पशोरेकहविष्ट्वं समस्तचोदितत्वात् १ प्रत्यङ्गं वा ग्रहवदङ्गानां पृथक्प्रकल्पनत्वात् २ हविर्भेदात्कर्मणोऽभ्यासस्तस्मात्तेभ्योऽवदानं स्यात् ३ आज्यभागवद्वा निर्देशात्परिसंख्या स्यात् ४ तेषां वा द्व्यवदानत्वं विवक्षन्नभिनिर्दिशेत्पशोः पञ्चावदानत्वात् ५ अंसशिरोऽनूकसक्थिप्रतिषेधश्च तदन्यपरिसंख्यानेऽनर्थकः स्यात्प्रदान-

त्वात्तेषां निरवदानप्रतिषेधः स्यात् ६ अपि वा परिसंख्या स्यादन-
वदानीयशब्दत्वात् ७ अब्राह्मणे च दर्शनात् ८ शृताशृतोपदेशाच्च
तेषामुत्सर्गवदयज्ञशेषत्वं सर्वेषां श्रपणं स्यात् ९ इज्याशेषात्स्विष्टकृ-
दिज्येत प्रकृतिवत् १० त्र्यङ्गैर्वा शरवद्विकारः स्यात् ११ अध्यूध्नी
तु होतुस्त्र्यङ्गवदिडाभक्षविकारः स्यात् १२ शेषे वा समवैति
तस्माद्रथवन्नियमः स्यात् १३ अशास्त्रत्वात्तु नैवं स्यात् १४ अपि
वा दानमात्रं स्याद्भक्षशब्दानभिसम्बन्धात् १५ दातुस्त्वविद्यमान-
त्वादिडाभक्षविकारः स्याच्छेषं प्रत्यविशिष्टत्वात् १६ अग्नीधश्च
वनिष्ठुरध्यूध्नीवत् १७ अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् १८
स्याद्वा होत्रध्वर्युविकारत्वात्तयोः कर्माभिसम्बन्धात् १९ द्विभागः
स्याद्द्विकर्मत्वात् २० एकत्वाद्वैकभागः स्याद्भागस्याश्रुतिभूतत्वात्
२१ प्रतिप्रस्थातुश्च वपाश्रपणात् २२ अभक्षो वा कर्मभेदात्तस्यां
सर्वप्रदानत्वात् २३ विकृतौ प्राकृतस्य विधेर्ग्रहणात्पुनःश्रुतिरनर्थिका
स्यात् २४ अपि वाग्नेयवद्द्विशब्दत्वं स्यात् २५ न वा शब्दपृथ-
क्त्वात् २६ अधिकं वार्थवत्त्वात्स्यादर्थवादगुणाभावे वचनादविकारे
तेषु हि तादर्थ्यं स्यादपूर्वत्वात् २७ प्रतिषेधः स्यादिति चेत् २८
नाश्रुतत्वात् २९ अग्रहणादिति चेत् ३० न तुल्यत्वात् ३१ तथा
तद्ग्रहणे स्यात् ३२ अपूर्वतां तु दर्शयेद्ग्रहणस्यार्थवत्त्वात् ३३ ततो-
ऽपि यावदुक्तं स्यात् ३४ स्विष्टकृद्भक्षप्रतिषेधः स्यात्तुल्यकारणत्वात्
३५ अप्रतिषेधो वा दर्शनादिडायां स्यात् ३६ प्रतिषेधो वा
विधिपूर्वस्य दर्शनात् ३७ शंय्विडान्तत्वे विकल्पः स्यात्परेषु पत्न्य-
नुयाजप्रतिषेधोऽनर्थको हि स्यात् ३८ नित्यानुवादो वा कर्मणः स्या-
दशब्दत्वात् ३९ प्रतिषेधार्थवत्त्वाच्चोत्तरस्य परस्तात्प्रतिषेधः स्यात् ४०
प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ४१ प्रतिषेधस्य त्वरायुक्तत्वा-
त्तस्य च नान्यदेशत्वम् ४२ उपसत्सु यावदुक्तमकर्म स्यात् ४३ स्रौवेण
वागुणत्वाच्छेषप्रतिषेधः स्यात् ४४ अप्रतिषिद्धं वा प्रतिषिध्य प्रति-
प्रसवात् ४५ अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ४६
अवभृथे बर्हिषः प्रतिषेधाच्छेषकर्म स्यात् ४७ आज्यभागयोर्वा गुण-
त्वाच्छेषप्रतिषेधः स्यात् ४८ प्रयाजानां त्वेकदेशप्रतिषेधाद्वाक्यशेषत्वं

तस्मान्नित्यानुवादः स्यात् ४९ आज्यभागयोर्ग्रहणं नित्यानुवादो गृहमेधीयवत्स्यात् ५० विरोधिनामेकश्रुतौ नियमः स्याद्ग्रहणस्यार्थवत्त्वाच्छरवच्च श्रुतितो विशिष्टत्वात् ५१ उभयप्रदेशान्नेति चेत् ५२ शरेष्वपीति चेत् ५३ विरोध्यग्रहणात्तथा शरेष्विति चेत् ५४ तथेतरस्मिन् ५५ श्रुत्यानर्थक्यमिति चेत् ५६ ग्रहणस्यार्थवत्त्वादुभयोरप्रतिपत्तिः स्यात् ५७ सर्वासां च गुणानामर्थवत्त्वाद्ग्रहणमप्रवृत्ते स्यात् ५८ अधिकं स्यादिति चेत् ५९ नार्थाभावात् ६० तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ६१ यावच्छ्रुतीति चेत् ६२ न प्रकृतावशब्दत्वात् ६३ विकृतौ त्वनियमः स्यात्पृषदाज्यवद्ग्रहणस्य गुणार्थत्वादुभयोश्च प्रदिष्टत्वाद्गुणशास्त्रं यदेति स्यात् ६४ ऐकार्थ्याद्वा नियम्येत श्रुतितो विशिष्टत्वात् ६५ विरोधित्वाच्च लोकवत् ६६ क्रतोश्च तद्गुणत्वात् ६७ विरोधिनां च तच्छ्रुतावशब्दत्वाद्विकल्पः स्यात् ६८ पृषदाज्ये समुच्चयाद्ग्रहणस्य गुणार्थत्वम् ६९ यद्यपि चतुरवत्तीति तु नियमे नोपपद्यते ७० क्रत्वन्तरे वा तन्न्यायत्वात्कर्मभेदात् ७१ यथाश्रुतीति चेत् ७२ न चोदनैकत्वात् ७३

इति सप्तमः पादः

अष्टमः पादः

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् १ अर्थप्राप्तवदिति चेत् २ न तुल्यहेतुत्वादुभयं शब्दलक्षणम् ३ अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात् ४ अपूर्वे चार्थवादः स्यात् ५ शिष्ट्वा तु प्रतिषेधः स्यात् ६ न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्च ७ पूर्वैश्च तुल्यकालत्वात् ८ उपवादश्च तद्वत् ९ प्रतिषेधादकर्मेति चेत् १० न शब्दपूर्वत्वात् ११ दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात्सर्वदानहोमपाकप्रतिषेधः स्यात् १२ अक्रतुयुक्तानां वा धर्मः स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् १३ तस्य वाप्यानुमानिकमविशेषात् १४ अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यात्

१५ अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्संदिग्धमाराद्विशेषशिष्टं स्यात् १६ अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणमविकृतमाज्यभागवत्प्राकृतप्रतिषेधार्थम् १७ विकारे तु तदर्थं स्यात् १८ वाक्यशेषो वा क्रतुनाग्रहणात्स्यादनारभ्यविधानस्य १९ मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात्स्यात् २० अनाम्नाते च दर्शनात् २१ प्रतिषेधाच्च २२ अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात् २३ मासि ग्रहणं च तद्वत् २४ ग्रहणं वा तुल्यत्वात् २५ लिङ्गदर्शनाच्च २६ ग्रहणं समानविधानं स्यात् २७ मासिग्रहणमभ्यासप्रतिषेधार्थम् २८ उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधानस्य होमसंयोगादधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् २९ तत्संस्कारश्रुतेश्च ३० ताभ्यां वा सह स्विष्टकृतः सकृत्त्वे द्विरभिघारणेन तदाप्तिवचनात् ३१ तुल्यवच्चाभिधाय सर्वेषु भक्त्यनुक्रमणात् ३२ साप्तदश्यवन्नियम्येत ३३ हविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात् ३४ पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्वैश्यस्तोमवत् ३५ न त्वनित्याधिकारोऽस्ति विधौ नित्येन सम्बन्धस्तस्मादवाक्यशेषत्वम् ३६ सति च नैकदेशेन कर्तुः प्रधानभूतत्वात् ३७ कृत्स्नत्वात्तु तथा स्तोमे ३८ कर्तुः स्यादिति चेत् ३९ न गुणार्थत्वात्प्राप्ते न चोपदेशार्थः ४० कर्मणोस्तु प्रकरणे तन्न्यायत्वाद्गुणानां लिङ्गेन कालशास्त्रं स्यात् ४१ यदि तु सांनाय्यं सोमयाजिनो न ताभ्यां समवायोऽस्ति विभक्तकालत्वात् ४२ अपि वा विहितत्वाद्गुणार्थायां पुनः श्रुतौ संदेहे श्रुतेर्द्विदेवतार्था स्याद्यथानभिप्रेतस्तथाग्नेयो दर्शनादेकदेवते ४३ विधिं तु बादरायणः ४४ प्रतिषिद्धविज्ञानाद्वा ४५ तथा चान्यार्थदर्शनम् ४६ उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वाद्यथाकामी प्रतीयेत ४७ ध्रौवाद्वा सर्वसंयोगात् ४८ तद्वच्च देवतायां स्यात् ४९ तान्त्रीणां पुराकल्परूपः प्रकरणात् ५० धर्माद्वा स्यात्प्रजापतिः ५१ देवतायास्त्वनिर्वचनं तत्र शब्दस्येह मृदुत्वं तस्मादिहाधिकारेण ५२ विष्णुर्वा स्याद्धौत्राम्नानादमावास्याहविश्च स्याद्धौत्रस्य तत्र दर्शनात् ५३ अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगाद्गुणत्वान्मन्त्रो यथा प्रधानं स्यात् ५४ आनन्तर्यं च सांनाय्यस्य पुरोडाशेन दर्शयत्यमावास्याविकारे

५५ अग्नीषोमविधानात्तुपौर्णमास्यामुभयत्र विधीयते ५६ प्रतिषिद्ध्य विधानाद्वा विष्णुः समानदेशः स्यात् ५७ तथा चान्यार्थदर्शनम् ५८ न चानङ्गं सकृच्छ्रुतावुभयत्र विधीयेतासम्बन्धात् ५९ गुणानां च परार्थत्वात्प्रवृत्तौ विधिलिङ्गानि दर्शयति ६० विकारे चाश्रुतित्वात् ६१ द्विपुरोडाशायां स्यादन्तरार्थत्वात् ६२ अजामिकरणार्थत्वाच्च ६३ तदर्थमिति चेन्न तत्प्रधानत्वात् ६४ अशिष्टेन च सम्बन्धात् ६५ उत्पत्तेस्तु निवेशः स्याद्गुणस्यानुपरोधेनार्थस्य विद्यमानत्वाद्विधानाद-न्तरार्थस्य नैमित्तिकत्वात्तदभावेऽश्रुतौ स्यात् ६६ उभयोस्तु विधानात् ६७ गुणानां च परार्थत्वादुपवेषवद्यदेति स्यात् ६८ अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ६९ प्रशंसार्थमजामित्वं यथामृतार्थत्वम् ७०

इत्यष्टमः पादः इति दशमोऽध्यायः

एकादशोऽध्यायः प्रथमः पादः

प्रयोजनाभिसम्बन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् १ शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत २ अविधानात्तु नैवं स्यात् ३ शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ४ अङ्गानां तु शब्दभेदात्क्रतुवत्स्यात्फलान्यत्वम् ५ अर्थभेदस्तु तत्रार्थेहैकार्थ्यादैक-कर्म्यम् ६ शब्दभेदान्नेति चेत् ७ कर्मार्थत्वात्प्रयोगे ताच्छब्द्यं स्यात्तद-र्थत्वात् ८ कर्तृविधेर्नानार्थत्वाद्गुणप्रधानेषु ९ आरम्भस्य शब्दपूर्वत्वात् १० एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत्स्यात् ११ फलाभावान्नेति चेत् १२ न कर्मसंयोगात्प्रयोजनमशब्ददोषं स्यात् १३ एकशब्द्यादिति चेत् १४ नार्थपृथक्त्वात्समत्वादगुण-त्वम् १५ विधेस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यवच्छ्रुतभूताभिसं-योगादर्थेन युगपत्प्राप्तेर्यथाप्राप्तं स्वशब्दो निवीतवत्सर्वप्रयोगे प्रवृत्तिः स्यात् १६ तथा कर्मोपदेशः स्यात् १७ क्रत्वन्तरेषु पुनर्वचनम् १८ उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात्स्वदोहे यथाकामी प्रतीयेत १९ कर्मण्यारम्भभाव्यत्वात्कृषिवत्प्रत्यारम्भं फलानि स्युः २० अधिकारश्च सर्वेषां कार्यत्वादुपपद्यते विशेषः २१ सकृत्तु स्यात्कृतार्थत्वादङ्गवत् २२ शब्दार्थश्च तथा लोके २३ अपि वा सम्प्रयोगे यथाकामी

प्रतीयेताश्रुतित्वाद्विधिषु वचनानि स्युः २४ एकशब्द्यात्तथाङ्गेषु २५ लोके कर्मार्थलक्षणम् २६ क्रियाणामर्थशेषत्वात्प्रत्यक्षतस्तन्निर्वृत्त्या-पवर्गः स्यात् २७ धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् २८ क्रतुवच्चानुमानेनाभ्यासे फलभूमा स्यात् २९ सकृद्वा कारणैकत्वात् ३० परिमाणं चानियमेन स्यात् ३१ फलस्यारम्भनिर्वृत्तेः क्रतुषु स्यात्फलान्यत्वम् ३२ अर्थवांस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात्प्रधाने च क्रियार्थत्वादनियमः स्यात् ३३ पृथक्त्वाद्विधितः परिमाणं स्यात् ३४ अनभ्यासो वा प्रयोग-वचनैकत्वात्सर्वस्य युगपच्छास्त्रादफलत्वाच्च कर्मणः स्यात्क्रियार्थत्वात् ३५ अभ्यासो वा छेदनसम्मार्गावदानेषु वचनात्सकृत्त्वस्य ३६ अन-भ्यासस्तु वाच्यत्वात् ३७ बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् ३८ दृष्टेः प्रयोग इति चेत् ३९ तथेह ४० भक्त्येति चेत् ४१ तथेत-रस्मिन् ४२ प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् ४३ श्रुत्य-र्थाविशेषात् ४४ तथा चान्यर्थदर्शनम् ४५ प्रकृत्या च पूर्ववत्तदासत्तेः ४६ उत्तरासु यावत्स्वमपूर्वत्वात् ४७ यावत्स्वं वान्यविधानेनानुवादः स्यात् ४८ साकल्यविधानात् ४९ बह्वर्थत्वाच्च ५० अग्निहोत्रे चाशेषवद्यवागूनियमः प्रतिषेधः कुमाराणाम् ५१ सर्वप्रायिणापि लिङ्गेन संयुज्यते देवताभिसंयोगात् ५२ प्रधानकर्मार्थत्वादङ्गानां तद्भेदात्कर्मभेदः प्रयोगे स्यात् ५३ क्रमकोपश्च यौगपद्यात्स्यात् ५४ तुल्यानां तु यौगपद्यमेकशब्दोपदेशात्स्याद्विशेषाग्रहणात् ५५ एकार्थ्यादव्यवायः स्यात् ५६ तथा चान्यार्थदर्शनं कामुकायनः ५७ तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात्संस्कारस्य तदर्थत्वात् ५८ असंसृष्टोऽपि तादर्थ्यात् ५९ विभवाद्वा प्रदीपवत् ६० अर्थात्तु लोके विधितः प्रतिप्रधानं स्यात् ६१ सकृदिज्यां कामुकायनः परि-माणविरोधात् ६२ विधेस्त्वितरार्थत्वात्सकृदिज्या श्रुतिव्यतिक्रमः स्यात् ६३ विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ६४ अपि चैकेन संनिधानमविशेषको हेतुः ६५ विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ६६ क्वचिद्विधानान्नेति चेत् ६७ न विधेश्चोदितत्वात् ६८ व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणाम् ६९ भेदस्तु

कालभेदाच्चोदनाव्यवायात्स्याद्विशिष्टानां विधिः प्रधानकालत्वात् ७० तथा चान्यार्थदर्शनम् ७१ विधिरिति चेन्न वर्तमानापदेशात् ७२

इति प्रथमः पादः

द्वितीयः पादः

एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात् १ अविधिश्चेत्कर्मणा-मभिसम्बन्धः प्रतीयेत तल्लक्षणार्थाभिसंयोगाद्विधित्वाच्चेतरेषां प्रति-प्रधानभावः स्यात् २ अङ्गेषु च तदभावः प्रधानं प्रतिनिर्देशाद्यथा द्रव्यदेवतम् ३ यदि तु कर्मणो विधिसम्बन्धः स्यादैकशब्द्या-त्प्रधानार्थाभिसंयोगात् ४ तथा चान्यार्थदर्शनम् ५ श्रुतिश्चैषां प्रधानवत्कर्मश्रुतेः परार्थत्वात् ६ कर्मणोऽश्रुतित्वाच्च ७ अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादेकदेशत्वम् ८ द्रव्यदेवतं तथेति चेत् ९ न चोदनाविधिशेषत्वान्नियमार्थौ विशेषः १० तेषु समवेतानां समवायात्तन्त्रमङ्गानि भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्तथा चान्यार्थदर्शनम् ११ इष्टिराजसुयचा तुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्यात् १२ कालभेदान्नेति चेत् १३ नैकदेशत्वात्पशुवत् १४ अपि वा कर्मपृथक्त्वात्तेषां तन्त्रविधानात्साङ्गानामुपदेशः स्यात् १५ तथा चान्यार्थदर्शनम् १६ तथा तदवयवेषु स्यात् १७ पशौ तु चोदनैकत्वात्तन्त्रस्य विप्रकर्षः स्यात् १८ तथा स्यादध्वरकल्पेष्टौ विशेषस्यैककालत्वात् १९ इष्टिरिति चैकवच्छ्रुतिः २० अपि वा कर्मपृथक्त्वात्तेषां च तन्त्र-विधानात्साङ्गानामुपदेशः स्यात् २१ प्रथमस्य वा कालवचनम् २२ फलैकत्वादिष्टिशब्दो यथान्यत्र २३ वसाहोमस्तन्त्रमेकदेवतेषु स्यात्प्रदानस्यैककालत्वात् २४ कालभेदात्त्वावृत्तिर्देवताभेदे २५ अन्ते यूपाहुतिस्तद्वत् २६ इतरप्रतिषेधो वा २७ अनुवादमात्रमन्तिकस्य २८ अशास्त्रत्वाच्च देशानाम् २९ अवभृथे प्रधानेऽग्निविकारः स्यान्न हि तद्धेतुरग्निसंयोगः ३० द्रव्यदेवतवत् ३१ साङ्गो वा प्रयोगवचनैकत्वात् ३२ लिङ्गदर्शनाच्च ३३ शब्दविभागाच्च देवतानपनयः ३४ दक्षिणेऽग्नौ वरुणप्रघासेषु देशभेदात्सर्वं क्रियते

३५ अचोदनेति चेत् ३६ स्यात्पौर्णमासीवत् ३७ प्रयोगचोदनेति चेत् ३८ इहापि मारुत्याः प्रयोगश्चोद्यते ३९ आसादनमिति चेत् ४० नोत्तरेणैकवाक्यत्वात् ४१ अवाच्यत्वात् ४२ आम्नायवचनं तद्वत् ४३ कर्तृभेदस्तथेति चेत् ४४ न समवायात् ४५ लिङ्गदर्शनाच्च ४६ वेदिसंयोगादिति चेत् ४७ न देशमात्रत्वात् ४८ एकवाक्यत्वात् ४९ एकाग्नित्वादपरेषु तन्त्रं स्यात् ५० नाना वा कर्तृभेदात् ५१ पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद्ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् ५२ संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् ५३ वाक्यैकत्वे क्रतुसामान्यात् ५४ वपानां चानभिघारणस्य दर्शनात् ५५ पञ्चशारदीयास्तथेति चेत् ५६ न चोदनैकवाक्यत्वात् ५७ यातयामत्वाच्च ५८ संस्कारणां च तद्दर्शनात् ५९ दशपेये क्रयप्रतिकर्षात्प्रतिकर्षस्ततः प्राचां तत्समानं तन्त्रं स्यात् ६० समानवचनं तद्वत् ६१ अप्रतिकर्षो वार्थहेतुत्वात्सहत्वं विधीयते ६१ पूर्वस्मिंश्चावभृथस्य दर्शनात् ६२ दीक्षाणां चोत्तरस्य ६३ समानः कालसामान्यात् ६४ निष्कासस्यावभृथे तदेकदेशत्वात्पशुवत्प्रदानविप्रकर्षः स्यात् ६५ अपनयो वा प्रसिद्धेनाभिसंयोगात् ६६ प्रतिपत्तिरिति चेन्न कर्मसंयोगात् ६७ उदयनीये च तद्वत् ६८ प्रतिपत्तिर्वाकर्मसंयोगात् ६९ अर्थकर्म वा शेषत्वाच्छ्रयणवत्तदर्थेन विधानात् ७०

इति द्वितीयः पादः

तृतीयः पादः

अङ्गानां मुख्यकालत्वाद्वचनादन्यकालत्वम् १ द्रव्यस्य चाकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात्स्वकालत्वात् २ यूपश्चाकर्मकालत्वात् ३ एकयूपं च दर्शयति ४ संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ५ तत्कालस्तु यूपकर्मत्वात्तस्य धर्मविधानात्सर्वार्थानां च वचनादन्यकालत्वम् ६ सकृन्मानं च दर्शयति ७ स्वरुस्तन्त्रापवर्गः स्यादस्वकालत्वात् ८ साधारणे वानुनिष्पत्तिस्तस्य साधारणत्वात् ९ सोमान्ते च प्रतिपत्तिदर्शनात् १० तत्कालो वा प्रस्तरवत् ११ न चोत्पत्तिवाक्यत्

वात्प्रदेशात्प्रस्तरे तथा १२ अहर्गणे विषाणाप्रासनं धर्मविप्रतिषेधादन्ते प्रथमे वाहनि विकल्पः स्यात् १३ पाणेस्त्वश्रुतिभूतत्वाद्विषाणानि-यमः स्यात्प्रातः सवनमध्यत्वाच्छिष्टे चाभिप्रवृत्तत्वात् १४ शिष्टे चाभिप्रवृत्तत्वात् १५ वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात् १६ यथाह्वानमपीति चेत् १७ पशौ च स पुरोडाशे समानतन्त्रं भवेत् १८ अङ्गप्रधानार्थो योगः सर्वापवर्गे च विमोकः स्यात् १९ अग्नियोगः सोमकाले तदर्थत्वात्संस्कृतकर्मणः परेषु साङ्गस्य तस्मात्सर्वापवर्गे विमोकः स्यात् २० प्रधानापवर्गे वा तदर्थत्वात् २१ अवभृथे च तद्वत्प्रधानार्थस्य प्रतिषेधोऽपवृक्तार्थत्वात् २२ अहर्गणे च प्रत्यहं स्यात्तदर्थत्वात् २३ सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात् २४ तत्कालत्वादावर्तेत प्रयोगतो विशेषसम्बन्धात् २५ अप्रयोगाङ्गमिति चेत् २६ स्यात्प्रयोगनिर्देशात्कर्तृभेदवत् २७ तद्भूतस्थानादग्निवदिति चेत्तदपवर्गस्तदर्थत्वात् २८ अग्निवदिति चेत् २९ न प्रयोगसाधार-ण्यात् ३० लिङ्गदर्शनाच्च ३१ तद्धि तथेति चेत् ३२ नाशिष्टत्वा-दितरन्यायत्वाच्च ३३ विध्येकत्वादिति चेत् ३४ न कृत्स्नस्य पुनः प्रयोगात्प्रधानवत् ३५ लौकिके तु यथाकामी संस्कारानर्थलोपात् ३६ यज्ञायुधानि धार्येरन्प्रतिपत्तिविधानादृजीषवत् ३७ यजमानसंस्कारो वा तदर्थः श्रूयते तत्र यथाकामी तदर्थत्वात् ३८ मुख्यधारणं वा मरणस्यानियतत्वात् ३९ यो वा यजनीयेहनि म्रियेत सोऽधिकृतः स्यादुपवेषवत् ४० न शास्त्रलक्षणत्वात् ४१ उत्पत्तिर्वा प्रयोज-कत्वादाशिरवत् ४२ शब्दासामञ्जस्यमिति चेत् ४३ तथाशिरेऽपि ४४ शास्त्रात्तु विप्रयोगस्तत्रैकद्रव्यचिकीर्षा प्रकृतावथेहापूर्वार्थवद्भूतो-पदेशः ४५ प्रकृत्यर्थत्वात्पौर्णमास्याः क्रियेरन् ४६ अग्न्याधेये वाविप्रतिषेधात्तानि धारयेन्मरणस्यानिमित्तत्वात् ४७ प्रतिपत्तिर्वा यथान्येषाम् ४८ उपरिष्टात्सोमानां प्राजापत्यैश्चरन्तीति सर्वेषामवि-शेषादवाच्यो हि प्रकृतिकालः ४९ अङ्गविपर्यासो विनावचनादिति चेत् ५० उत्कर्षः संयोगात्कालमात्रमितरत्र ५१ प्रकृतिकालासत्तेः शस्त्रवतामिति चेत् ५२ न श्रुतिप्रतिषेधात् ५३ विकारस्थाने इति चेत् ५४ न चोदनापृथक्त्वात् ५५ उत्कर्षे सूक्तवाकस्य

न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वाद्यथा निष्कर्षेनान्वयः ५६
वाक्यसंयोगाद्वोत्कर्षः समानतन्त्रत्वादर्थलोपादनन्वयः ५७
इति तृतीयः पादः

चतुर्थः पादः

चोदनैकत्वाद्राजसूयेऽनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि १ प्रति-दक्षिणं वा कर्तृसम्बन्धादिष्टिवदङ्गभूतत्वात्समुदायो हि तन्निर्वृत्त्या तदेकत्वादेकशब्दोपदेशः स्यात् २ तथा चान्यार्थदर्शनम् ३ अनियमः स्यादिति चेत् ४ नोपदिष्टत्वात् ५ लाघवापत्तिश्च ६ प्रयोजनैकत्वात् ७ अविशेषार्थौ पुनः श्रुतिः ८ अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्श-नाद्वचनात्कामसंयोगेन ९ क्रत्वर्थायामिति चेन्न वर्णसंयोगात् १० पवमानहविःष्वैकतन्त्र्यं प्रयोगवचनैकत्वात् ११ लिङ्गदर्शनाच्च १२ वर्तमानापदेशाद्वचनात्तु तन्त्रभेदः स्यात् १३ सहत्वे नित्यानुवादः स्यात् १४ द्वादशाहे तु प्रकृतित्वादेकैकमहरपवृज्येत कर्मपृथक्त्वात् १५ अह्नां वा श्रुतिभूतत्वात्तत्र साङ्गं क्रियेत यथा माध्यन्दिने १६ अपि वा फलकर्तृसम्बन्धात्सह प्रयोगः स्यादाग्नेयाग्नीषोमीयवत् १७ साङ्गकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात् १८ दीक्षोपसदां च संख्या पृथक्पृथक्प्रत्यक्षसंयोगात् १९ वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमन्यकालत्वादवभृथादीन्युत्तराणि दीक्षाविसर्गार्थत्वात् २० तथा चान्यार्थदर्शनम् २१ चोदनापृथक्त्वे त्वैकतन्त्र्यं समवेतानां कालसं-योगात् २२ भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात् २३ तथा चान्यार्थदर्शनम् २४ श्वासुत्यावचनं तद्वत् २५ पश्वतिरेकश्च २६ सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् २७ अपि वेन्द्राभिधानत्वात्सकृत्स्यादुपलक्षणं कालस्य लक्षणार्थत्वात् २८ अविभागाच्च २९ पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात्तन्त्रभावः स्यात् ३० भेदस्तु संदेहाद्देवतान्तरे स्यात् ३१ अर्थाद्वा लिङ्गकर्म स्यात् ३२ प्रतिपाद्यत्वाद्वसानां भेदः स्यात्स्वयाज्याप्रदानत्वात् ३३ अपि वा प्रतिपत्तित्वात्तन्त्रं स्यात्स्वत्वस्याश्रुतिभूतत्वात् ३४ सकृदिति चेत् ३५ न कालभेदात् ३६ पक्तिभेदात्कुम्भीशूलवपाश्रपणीनां भेदः स्यात् ३७

जात्यन्तरेषु भेदः स्यात्पत्तिवैषम्यात् ३८ वृद्धिदर्शनाच्च ३९ कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ४० प्रतिप्रधानं वा प्रकृतिवत् ४१ सर्वेषां वाभिप्रथमं स्यात् ४२ एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वं तस्मिन्मन्त्रार्थनानात्वादावृत्तौ मन्त्रस्यासकृत्प्रयोगः स्यात् ४३ द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य च तद्गुणत्वात्पुनः प्रयोगः स्यात्तदर्थेन विधानात् ४४ निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत्प्रयोजनैकत्वात् ४५ द्रव्यान्तरवद्वा स्यात्तत्संस्कारात् ४६ वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ४७ एकस्य वा गुणविधिर्द्रव्यैकत्वात्तस्मात्सकृत्प्रयोगः स्यात् ४८ कंडूयने प्रत्यङ्गं कर्मभेदात्स्यात् ४९ अपि वा चोदनैककालमैककर्म्यं स्यात् ५० स्वप्नदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ५१ प्रयाणे त्वार्थनिर्वृत्तेः ५२ उपरवमन्त्रस्तन्त्रं स्याल्लोकवद्बहुवचनात् ५३ न संनिपातित्वादसंनिपातिकर्मणां विशेषग्रहणे कालैकत्वात्सकृद्वचनम् ५४ हविष्कृदध्रिगुपुरोऽनुवाक्यामनोतस्यावृत्तिः कालभेदात्स्यात् ५५ अध्रिगोश्च विपर्यासात् ५६ करिष्यद्वचनात् ५७

इति चतुर्थः पादः इत्येकादशोऽध्यायः

द्वादशोऽध्यायः प्रथमः पादः

तन्त्रिसमवाये चोदनातः समानानामेकतन्त्र्यमतुल्येषु तु भेदः स्याद्विधिप्रक्रमतादर्थ्याच्छ्रुतिकालनिर्देशात् १ गुणकालविकाराच्च तन्त्रभेदः स्यात् २ तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्याविशिष्टत्वात् ३ विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ४ एकेषां वा शक्यत्वात् ५ आहोपुरीषकं स्यात् ६ एकाग्निवच्च दर्शनम् ७ जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रप्रतिषेधः स्यात् ८ नानार्थत्वात्सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् ९ अकर्म वा कृतदूषा स्यात् १० पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् ११ न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् १२ शामित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् १३ श्रपणं वाग्निहोत्रस्य शालामुखीये न स्यात्प्राजहितस्य विद्यमानत्वात् १४ हविर्धाने निर्वपणार्थं साधयेतां प्रयुक्तत्वात् १५ असिद्धिर्वान्य-

देशत्वात्प्रधानवैगुण्यादवैगुण्ये प्रसङ्गः स्यात् १६ अनसां च दर्शनात् १७ तद्युक्तत्वं च कालभेदात् १८ मन्त्राश्च संनिपातित्वात् १९ धारणार्थत्वात्सोमेऽग्न्यन्वाधानं न विद्यते २० तथा व्रतमुपेतत्वात् २१ विप्रतिषेधाच्च २२ सत्यवदिति चेत् २३ न संयोगपृथक्त्वात् २४ ग्रहार्थं च पूर्वमिष्टेस्तदर्थत्वात् २५ शेषवदिति चेन्न वैश्वदेवो हि स्याद्व्यपदेशात् २६ न गुणार्थत्वात् २७ संनहनं च वृत्तत्वात् २८ अन्यविधानादारण्यभोजनं न स्यादुभयं हि वृत्त्यर्थम् २९ शेषभक्षास्तथेति चेन्नान्यार्थत्वात् ३० भृतत्वाच्च परिक्रयः ३१ शेषभक्षास्तथेति चेत् ३२ न कर्मसंयोगात् ३३ प्रवृत्तवरणात्प्रति तन्त्रवरणात्प्रतितन्त्रवरणं होतुः क्रियेत ३४ ब्रह्मापीति चेत् ३५ न प्राग्नियमात्तदर्थं हि ३६ निर्दिष्टस्येति चेत् ३७ नाश्रुतत्वात् ३८ होतुस्तथेति चेत् ३९ न कर्मसंयोगात् ४० यज्ञोत्पत्त्युपदेशे निष्ठितकर्मप्रयोगभेदात्प्रतितन्त्रं क्रियेत ४१ न वा कृतत्वात्तदुपदेशो हि ४२ देशपृथक्त्वान्मन्त्रो व्यावर्तते ४३ संनहनहरणे तथेति चेत् ४४ नान्यार्थत्वात् ४५

इति प्रथमः पादः

द्वितीयः पादः

विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात् १ मांसपाकप्रतिषेधश्च तद्वत् २ निर्देशाद्वा वैदिकानां स्यात् ३ सति चोपासनस्य दर्शनात् ४ अभावदर्शनाच्च ५ मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात् ६ वाक्यशेषो वा दक्षिणेऽस्मिन्ननारभ्यविधानस्य ७ सवनीये छिद्रा-पिधानार्थत्वात्पशुपुरोडाशो न स्यादन्येषामेवमर्थत्वात् ८ क्रिया वा देवतार्थत्वात् ९ लिङ्गदर्शनाच्च १० हविष्कृत्सवनीयेषु न स्यात्प्रकृतौ यदि सर्वार्था पशुं प्रत्याहूता सा कुर्याद्विद्यमानत्वात् ११ पशौ तु संस्कृते विधानात्तार्तीयसवनिकेषु स्यात्सौम्याश्विनयोश्चापवृक्तार्थत्वात् १२ योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात् १३ निशि यज्ञे प्राकृतस्याप्र-वृत्तिः स्यात्प्रत्यक्षशिष्टत्वात् १४ कालवाक्यभेदाच्च तन्त्रभेदः स्यात् १५ वेद्युद्धननव्रतं विप्रतिषेधात्तदेव स्यात् १६ तन्त्रमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् १७ वैगुण्यादिध्मबर्हिर्न साधयेदग्न्यन्वाधानं च

यदि देवतार्थम् १८ अग्न्यन्वाधानं च यदि देवतार्थम् १९ आरम्भणीया विकृतौ न स्यात्प्रकृतिकालमध्यत्वात्कृता पुनस्तदर्थेन २० सकृदारम्भसंयोगात् २१ स्याद्वा कालस्याशेषभूतत्वात् २२ आरम्भविभागाच्च २३ विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मकत्वम् २४ मुख्यं वा पूर्वचोदनाल्लोकवत् २५ तथा चान्यार्थदर्शनम् २६ अङ्गगुणविरोधे च तादर्थ्यात् २७ परिधेर्द्व्यर्थत्वादुभयधर्मा स्यात् २८ यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात् २९ इतरो वा तस्य तत्र विधानादुभयोश्चाङ्गसंयोगः ३० पशुसवनीयेषु विकल्पः स्याद्वैकृतश्चेदुभयोरश्रुतिभूतत्वात् ३१ पाशुकं वा वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ३२ पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् ३३ अपूर्वं च प्रकृतौ समानतन्त्रा चेदनित्यत्वादनर्थकं हि स्यात् ३४ अधिकश्च गुणः साधारणेऽविरोधात्कांस्यभोजिवदमुख्येऽपि ३५ तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तवाकेन ३६ न वाविरोधात् ३७ अशास्त्रलक्षणत्वाच्च ३८

इति द्वितीयः पादः

तृतीयः पादः

विश्वजिति वत्सत्वङ्नामधेयादितरथा तन्त्रभूयस्त्वादहतं स्यात् १ अविरोधो वा उपरिवासो हि वत्सत्वक् २ अनुनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्याच्छिवष्टकृद्दर्शनाच्च ३ आगन्तुकत्वाद्वा स्वधर्मा स्याच्छ्रुतिविशेषादितरस्य च मुख्यत्वात् ४ स्वस्थानत्वाच्च ५ स्विष्टकृच्छ्रपणान्नेति चेद्विकारः पवमानवत् ६ अविकारो वा प्रकृतिवच्चोदनां प्रति भावाच्च ७ एककर्मणि शिष्टत्वाद्गुणानां सर्वकर्म स्यात् ८ एकार्थास्तु विकल्पेरन्समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य ९ अभ्यस्येतार्थवत्त्वादिति चेत् १० नाश्रुतत्वाद्धि ११ सति चाभ्यासशास्त्रत्वात् १२ विकल्पवच्च दर्शयति १३ कालान्तरेऽर्थवत्त्वं स्यात् १४ प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घातः १५ समुच्चयस्त्वदोषार्थेषु १६ मन्त्राणां कर्मसंयोगः स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् १७ विद्यां प्रतिविधानाद्वा

सर्वकारणं प्रयोगः स्यात्कर्मार्थत्वात्प्रयोगस्य १८ भाषास्वरोपदेशे ऐरवत्प्रायवचनप्रतिषेधः स्यात् १९ मन्त्रोपदेशो वा न भाषिकस्य प्रायोपपत्तेर्भाषिकश्रुतिः २० विकारः कारणाग्रहणे तन्न्यायत्वाद्दृष्टेऽप्येवम् २१ तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् २२ मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसंनिपातः स्यात्सर्वस्य वचनार्थत्वात् २३ संततवचनाद्धारायामादिसंयोगः २४ कर्मसंतानो वा नानाकर्मत्वादितरस्याशक्यत्वात् २५ आघारे च दीर्घधारत्वात् २६ मन्त्राणां संनिपातित्वादेकार्थानां विकल्पः स्यात् २७ संख्याविहितेषु समुच्चयोऽसंनिपातित्वात् २८ ब्राह्मणविहितेषु च संख्यावत्सर्वेषामुपदिष्टत्वात् २९ याज्यावषट्कारयोश्च समुच्चयदर्शनं तद्वत् ३० विकल्पो वा समुच्चयस्याश्रुतित्वात् ३१ गुणार्थत्वादुपदेशस्य ३२ वषट्कारे नानार्थत्वात्समुच्चयो हौत्रास्तु विकल्पेरन्नेकार्थत्वात् ३३ क्रियमाणानुवादित्वात्समुच्चयो वा हौत्राणाम् ३४ समुच्चयं च दर्शयति ३५

इति तृतीयः पादः

चतुर्थः पादः

जपाश्चाकर्मसंयुक्ताः स्तुत्याशीरभिधानाश्च याजमानेषु समुच्चयः स्यादाशीःपृथक्त्वात् १ समुच्चयं च दर्शयति २ याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् ३ लिङ्गदर्शनाच्च ४ क्रयेषु तु विकल्पः स्यादेकार्थत्वात् ५ समुच्चयो वा प्रयोगद्रव्यसमवायात् ६ समुच्चयं च दर्शयति ७ संस्कारे च तत्प्रधानत्वात् ८ संख्यासु तु विकल्पः स्याच्छ्रुतिप्रतिषेधात् ९ द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्तया विकल्पेन नियमप्रधानत्वात् १० द्रव्यत्वेऽपि समुच्चयो द्रव्यस्य कर्मनिष्पत्तेः प्रतिपशुकर्मभेदादेवं सति यथाप्रकृति ११ कपालेऽपि तथेति चेत् १२ न कर्मणः परार्थत्वात् १३ प्रतिपत्तिस्तु शेषत्वात् १४ शृतेऽपि पूर्ववत्स्यात् १५ विकल्पोऽन्वर्थकर्मनियमप्रधानत्वाच्छेषे च कर्मकार्यसमवायात्तस्मात्तेनार्थकर्म स्यात् १६ उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् १७ असति

चासंस्कृतेषु कर्म स्यात् १८ तस्य च देवतार्थत्वात् १९ विकारो वा नित्यस्याग्नेः काम्येन तदुक्तहेतुः २० वचनादसंस्कृतेषु कर्म स्यात् २१ संसर्गे चापि दोषः स्यात् २२ वचनादिति चेदथेतरस्मिन्नुत्सर्गा-परिग्रहः कर्मणः कृतत्वात् २३ स आहवनीयः स्यादाहुतिसंयोगात् २४ अन्यो वोद्धत्याहरणात्तस्मिन्तु संस्कारकर्म शिष्टत्वात् २५ स्थानात्तु परिलुप्येरन् २६ नित्यधारणे विकल्पो न ह्यकस्मात्प्रतिषेधः स्यात् २७ नित्यधारणाद्वा प्रतिषेधो गतश्रियः २८ परार्थान्येकः प्रतियन्तिवत्सत्राहीनयो यजमानगणेऽनियमोऽविशेषात् २९ मुख्यो वाविप्रतिषेधात् ३० सत्रे गृहपतिरसंयोगाद्धौत्रवदाम्नायवचनाच्च ३१ सर्वैः वा तदर्थत्वात् ३२ गृहपतिरिति च समाख्या सामान्यात् ३३ विप्रतिषेधे परम् ३४ हौत्रे परार्थत्वात् ३५ वचनं परम् ३६ प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ३७ स्मृतेर्वा स्याद्ब्राह्मणानाम् ३८ फलचमसविधानाच्चेतरेषाम् ३९ सांनाय्येऽप्येवं प्रतिषेधः सौम-पीथहेतुत्वात् ४० चतुर्धाकरणे च निर्देशात् ४१ अन्वाहार्य्ये च दर्शनात् ४२

इति चतुर्थः पादः इति द्वादशोऽध्यायः

अथ श्रीजैमिनिमुनिप्रणीतः सङ्कर्षकाण्डः

प्रथमाध्याये प्रथमः पादः

अनुयजतीत्यनुवषट्कारश्चोद्यते १ स द्रोणकलशात् इज्येत सर्वार्थत्वात् यथाऽऽज्यार्था ध्रुवायाः २ विभक्तानि हवींषि तथा कर्माणि कर्म-संयोगात्पुनरिज्या ३ लिङ्गदर्शनाच्च ४ तन्त्रं प्रदानमेकदेवतत्वाद्यथा दर्शपूर्णमासयोः ५ एककालं तु न भवत्येवेदं कालपृथक्त्वात् ६ सवनभेदाच्च ७ अनुशब्दार्थवत्त्वाच्च ८ आवृत्तिं च दर्शयति ९ एतेन भक्षाश्च व्याख्याताः १० शामित्रं तीर्त्वोत्सृजेदिति कार्ष्णाजिनिः तन्त्रमध्रिगुः पर्यग्निकृतानिति चोद्यते ११ अनन्तरं वा पर्यग्निकरणात् किं प्रत्यक्षां श्रुतिमतिक्रामेद्यथा न प्रयाजा इज्यन्त इति नैकदेशप्रतिषेधः १२ अग्निं चित्वा सौत्रामण्या यजेतेति तत्संयोगेन चोदनात् १३ चय-नाङ्गं वा तत्संयोगेन चोदनात् १४ क्रत्वङ्गं वा चित्वेत्यङ्गे नोपपद्यते

यथैता एव निर्वपेदीजान इति १५ सा तदपवर्गे क्रियेत यथा संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति १६ अग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात् इत्येतेन व्याख्यातम् १७ चयनाङ्गं वाऽविप्रतिषेधात् अङ्गदक्षिणा च रथन्तरे वरं ददाति इति १८ अर्थवादसामर्थ्याच्च १९ योऽग्निं चिनुयात् तं दक्षिणाभी राधयेदित्येतेन व्याख्यानम् २० क्रत्वङ्गं वा प्रयोगश्रुतिसंयोगात् २१ गुणचोदना वा प्रीत्याचिख्यासा २२ उल्मुकहरणे रक्षोपहननं श्रूयते तत्प्राजापत्येष्वावर्तेत तत्कालपृथक्त्वात् २३ श्रपणार्थं तु हरणं प्रातस्सवने पुनस्साधारणं कर्म कृतम् २४ एतेने वपाया अग्रतः प्रत्याहरणं व्याख्यातं अविप्रतिषिद्धो हि तस्मिन् श्रपणार्थः २५ अभितो वपां जुहोतीति देशवादो यथा अभितो वृक्षं निधेहीति २६ कर्मवादो वा प्रकरणात् २७ लिङ्गदर्शनाच्च २८ अभितः पुरोडाशमाहुती जुहोतीत्येतेन व्याख्यातम् २९ हविष्कृदेहीत्यध्वर्युरुच्यते प्रकरणात् ३० वाग्वा श्रुतिसंयोगात् ३१ पत्नी वा विधानात् ३२ यः कश्चिद्वा निर्वचनात् ३३ एतेषां वा वाक्यसन्निधानात् ३४ सर्वकर्मणां दैवी हविष्कृदेहीति अविशेषेण श्रूयते ३५ अवहननार्थं वा यथा पत्नी तुल्या श्रूयते ३६ अर्थवादमात्रं वा वाचो हविष्कृत्त्वं यथाऽश्विनोर्बाहुभ्यां निर्वपामीति ३७ मनुष्याः शमितारो वाक्यसन्निधानात् ३८ ऋत्विजो वा शमितारः सन्निधानं नयने श्रूयते शामित्राख्यां लभेरन् यथोद्गातारः ३९ अन्यो वा शमिता सर्वकर्मणामविशेषात् ४० श्रुतिभूतेष्वध्वर्युर्वेदसमाख्यायोगात् ४१ लिङ्गदर्शनाच्च ४२

इति सङ्कर्षकाण्डे प्रथमाध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः

पत्नीं सन्नह्येति यजमानस्य भार्यायाः पत्नीशब्दसामर्थ्यात् १ मन्त्र-वर्णाच्च २ लिङ्गाच्च ३ एवं वा । सर्वासां कर्तृत्वाविशेषात् ४ मन्त्रवर्णाच्च ५ भूयांसि कर्माण्यल्पीयांसो मन्त्राः तानि सर्वाणि मन्त्र-वन्ति ते मन्यामहे समशः प्रतिविभज्य पूर्वैः पूर्वाणि कुर्या-दुत्तरैरुत्तराण्येवंविषये प्रयुक्तानि यथासमाम्नानं भवन्ति ६ भूयांसो मन्त्राः अल्पीयांसि कर्माणि तत्रैकमन्त्रं कर्माणि कुर्यात् अवशिष्टा

विकल्पार्था यथा यूपद्रव्याणि ७ ऐन्द्रं पुरोडाशं पयसा प्रदाने कुर्यात् श्रुतिसंयोगात् ८ न वाऽनाम्नानात् ९ समानतन्त्रो वैमृधः पौर्णमास्या पयसा तुल्यवत् श्रूयते १० इष्ट्वेत्यपवृज्य विधानात् नानातन्त्रं स्यात् ११ दक्षिणाभेदाच्च १२ स नित्यो यथान्यान्यङ्गानि १३ न वा विप्रतिषेधात् १४ यद्येतानालभेतेत्येतेन व्याख्यातम् १५ अग्रशब्दः पौर्णमासीमधि-कुरुते तत्र ह्याम्नातः १६ प्रक्रमवादो वा वैमृधस्यानित्यत्वात् यथाग्रे कृत्वा नेदानीं करोतीति १७ न द्वे यजेतेत्यभ्युदितेष्टेः पर्वणश्चानन्तर्यात् १८ द्विरिज्यावादो वा न ह्यन्यत् प्रत्यक्षं वचनं विद्यते १९ यत्पितृभ्यः पूर्वेद्युः करोति पितृभ्य एव तद्यज्ञं निष्क्रीय देवेभ्यः प्रतनुते इति न तन्त्रादौ प्रक्लृप्तत्वात् २० उत्तरस्मिन्पर्वणि दृश्यमाने प्रतीयेत सन्निकर्षोऽभिप्रेतः २१ दक्षिणाग्नौ श्रपणं श्रूयते । तस्याहवनीये प्रदानं यथान्यासामाहुतीनां यदाहवनीये जुह्वति इति २२ दक्षिणाग्नेरेकोल्मुकं धूपाय धरतीत्येकेषां तत्र प्रदानमर्थवत् धारणं यथा पशावतिप्रणीतस्य २३ यस्मिन् श्रपयति तस्मिन् जुहोतीति दक्षिणाग्नौ २४ अप्यनाहिताग्निना कार्यं पितरश्चिन्मावेदयन्तीति २५ स लौकिकेऽग्नौ क्रियेत यथान्यानि कर्माणि २६ तत्र गार्हपत्यस्थानीयमागमयेत् यथा होमार्थे २७ न वा पृथगस्य संस्कारनिमित्तत्वात् २८ तत्र गार्हपत्यशब्दो लुप्येत संस्कारसंयोगात् २९ यत्पौर्णमास्यामग्नीषोमीयं तेनामावास्यायां यजेत कृतलक्षणग्रहणात् ३० अमावास्या विकृता तन्नामधेयं श्रूयते यथा त्रिवृदग्निष्टोमः इति स्तोत्राणां संख्याविकारः ३१ अग्नीषोमीयेण यजेत पौर्णमासीमिति नित्यकामो यथैन्द्रवायवे ३२ पौर्णमासी वा देवता क्रियते इत्येतेन व्याख्यातम् ३३

इति सङ्कर्षकाण्डे प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः

अथ तृतीयः पादः

सर्वाधिकारोऽविशेषेण श्रूयते १ दोहयोर्वा देवतासामान्यात् २ सह कुम्भीभिरभिक्रामन्नाहेति स्रुक् प्रत्याम्नायः श्रूयते यथा पलाशस्य मध्यमेन पर्णेन जुहोति इति ३ लिङ्गाच्च ४ कर्तृविवृद्धौ होमे प्रदानं प्रति पात्रविवृद्धिः ५ दोहकाले वा विवृद्धिरर्थपृथक्त्वात् यथा पुरोडाशविवृद्धौ चतुर्मुष्टिता

६ कुम्भीभिरित्युत्पन्नाधिकाराः शेषापनयार्थाः यथा सर्वहुतमेककपालं जुहोति इति ७ दारुपात्राणि कुम्भीभिर्विकल्पेरन्नेकार्थत्वात् ८ प्रवृत्तस्य प्रदानस्य पात्रापनयो यथा पात्नीवतं पर्यग्निकृतमुत्सृजेदिति ९ तत्र शेषाः क्रियेरन् पात्रान्यत्वात् १० नापनीतेषु श्रुतत्वात् तद्व्याख्यातम् ११ एतेनोपस्तरणं व्याख्यातम् १२ सन्ततमुच्येत शब्दसंयोगात् १३ यथाकालं वाऽर्थपृथक्त्वात् १४ द्विरिज्या पौर्णमास्यास्तयोरुभयोरविशेषेणाभ्यासः श्रूयते तेषामेतमर्धमासं प्रसुतस्सान्नाय्यं इति १५ उत्तरस्य वा विशेषश्रुतेः १६ सन्ततं यजेतात्यन्तसंयोगात् १७ सकृद्वा नाभ्यासः श्रूयते १८ तस्य व्रतम् यथा दर्शपूर्णमासयोः गुणविकारो हि १९ अन्तरालभूतं यथा चातुर्मास्येषु २० लिङ्गाच्च २१ आदिविकल्पो गुणविकाराणाम् २२ तन्त्रविकल्पो वा चोदनार्थो यावज्जीविकत्वात् २३ यूपविरोहणनैमित्तिकमुत्तरतत्यर्थं विप्रतिषेधात् प्रकृतौ २४ प्रकृतौ कालविप्रतिकर्षात् २५ तमपरमन्ववसाय यजेतेति समीपवादो यथा नदीमन्ववस्यतीति २६ द्रव्योपदेशो वा कर्मार्थत्वात् द्रव्याणाम् २७ लिङ्गाच्च २८ सोमे प्रतिषेधः तस्य द्रव्योपदेशात् २९ सर्वप्रतिषेधो वा विशेषात् ३० द्रव्योपदेशार्था सोमश्रुतिः ३१ साग्निचित्यानां वादः प्रकरणात् ३२ अनग्निचित्यानां वा यथा विश्वजिति ३३ लिङ्गाच्च ३४ सोमे दर्शपूर्णमासप्रकृतीनां बर्हिर्न विद्यते सौमिकं स्तीर्णं भवति प्रसङ्गस्तद्व्याख्यातम् ३५ उक्तं तु स्तीर्णस्योपरि तद्वचनात् ३६ प्लाक्षं सवनीयानां यथा शेषे यथा चतुरवत्ते ३७ अवदानस्तरणार्थं श्रूयते ३८ पशुपुरोडाशार्थमानन्तर्यात् ३९ पुरोडाशार्थं वा यथोत्तरयोरेकशब्देन विधीयते ४० अनुपृष्ठ्यं बर्हिस्तृणीहि इति सन्ततस्य वादो न ह्यन्यत्प्रत्यक्षं विद्यते ४१ यथाभागं व्यावर्तेथाम् इति देवतावादः तयोर्भागौ भवतः ४२ पिण्डवादो वा कर्मार्थत्वान्मन्त्राणाम् ४३ एतेन विभागलिङ्गा व्याख्याताः ४४ विभक्तयोर्वा देवतोपदेशः तल्लिङ्गत्वाच्छब्दस्य ४५ अग्नये त्वाग्नीषोमाभ्यामित्येतेन व्याख्यातम् ४६ पुरोडाशगणे व्यावर्तेथामित्येकैकं पिण्डमपच्छिन्द्यात् ४७ व्यावर्तध्वमिति वा-ऽर्थपृथक्त्वात् तदूहेन व्याख्यातम् ४८ उत्तमयोः यथासमाम्नानं अविप्रतिषेधात् ४९ सर्वत्र देवतागमः ५० उत्तमयोर्वा सन्देहात्

व्यवच्छेदेनेतरे विज्ञायन्ते ५१ चरुपुरोडाशीयाः प्रागधिवापनात् विभ-ज्येरन् तत्र विभागमन्त्रो निवर्तते अन्यकालत्वात् ५२ विद्यते वा हविर्विभागार्थः तानि विभज्यन्ते यथान्यकालाः । प्रयाजाः ५३ एकान्ते चरवस्तथा पुरोडाशास्तद्धर्माविप्रतिषेधात् ५४ व्यतिषक्तेषु पूर्ववदवच्छेदः क्रमसंयोगात् ५५ युगपद्वाऽविप्रतिषेधात् ५६ इदम-मुष्य चामुष्य च देहीत्येकैकमुपलक्षयेत् साधारणत्वात् द्रव्यस्य यथेदममुष्मै चामुष्मै च देहीति ५७ एतेन व्यतिषक्तेषु देवतोपलक्षणं व्याख्यातम् ५८ सर्वपृष्ठायां नाना हवींषि प्रदाने विभज्यन्ते तत्र विभागमन्त्रः क्रियते यथा चरुपुरोडाशेषु ५९ न हविर्विभागार्थः प्रदानं पुनरेतत्क्रियते ६०

इति संकर्षकाण्डे प्रथमस्याध्यायस्य तृतीयः पादः

अथ चतुर्थः पादः

कर्मचोदना वाजिनस्य यथाऽऽमिक्षायागः १ अप्रयोजकं वाजिनम् यथा फलीकरणहोमः २ वाजिनेनावसिञ्चेत् इत्यन्यदागमयेद्वाजिभ्यः तदनुपदिष्टम् ३ उत्पन्नाधिकारो वा वाजिनस्य प्रकृतं प्रविभज्यते यथा ध्रौवम् ४ आमिक्षायां स्विष्टकृन्न विद्यते वाजिनस्याम्नानात् प्रत्यामनेत् यथा त्र्यङ्गाणीति ५ नानाकर्मणी भवतस्तद्व्याख्यातम् ६ तस्य वाजिनं निरवदानं यथान्येषाम् हविषाम् ७ अनुवषट्करोति इति अनुविप्रकर्षे नोपपद्यते ८ लिङ्गाच्च ९ विशाखत्वं धर्ममात्रं यथा श्लक्ष्णाग्रता १० नियोजनं वार्थवत्त्वाद्यथा वरुणप्रघासेषु ११ लिङ्गाच्च १२ एतेन यूप-कर्म व्याख्यातं तत्संयोगाद्धर्माणाम् १३ ऊर्ध्वं नाभिदघ्नाद्विशाखं यथा तन्त्रं रशना १४ अधस्ताद्वा प्रकृत्युपबन्धात् १५ अग्रमध्यशब्दौ सन्न-म्येताम् अग्रमध्यपृथक्त्वात् १६ सहोपरं प्रमाणम् १७ यजमानसंमि-तौदुम्बरीं भवतीत्येतेन व्याख्यातम् १८ ऊर्ध्वं वा निखातादर्थे श्रूयते यथा पौरुषः प्राकार इति १९ नाभिदघ्ने परिव्ययति इत्येतेन व्याख्यातम् २० यजमानेन यूपः संमित इति विधानात् परिमाणानां यजमानेन सम्मानम् २१ अध्वर्योः प्रमाणं प्रकरणात् यथा शूर्पेण जुहोति इति २२ यथाकामी वा प्रयुक्तं शूर्पम् २३ चतुरो मुष्टीन्निर्वपतीत्येतेन

व्याख्यातम् २४ अध्वर्यौर्वा कर्मलक्षणत्वान्मुष्टेः यथा मुष्टिमादत्स्वेति २५ परिवीय वासयतीति वासमात्रं शब्दसंयोगात् २६ अर्थकर्म वा कर्मशब्देन विधीयते यथा परिधौ पशुं नियुञ्जीत इति २७ तासामेकां नाभिदघ्ने परिवीय यथावकाशमितरो विप्रतिषेधात् २८ युगपद्वा विप्रतिषेधात् २९ एतेन ऐकादशिन्यां द्वैरशन्यं व्याख्यातम् ३० विशेषेण वाग्निष्ठस्य रशने तयोरुपादानार्थो न विद्यते प्रमोक्षः पुनः युगपद्भावे स्यात् ३१ तन्त्रं यूपमन्त्रः यूपाभिधानमभिप्रेतम् ३२ वासमात्रं चैतत्स्याद्वासयत्यग्निष्ठे इत्यर्थकर्मणि अनर्थकं स्यात् तासां पुनरादेयत्वात् ३३ लिङ्गाच्च ३४ ऐकादशिनान् प्रतिषिध्य विधीयते ३५ तेषां वैकसङ्ख्याऽप्रतिषेधः श्रूयते यथैकां सामिधेनीमन्वाहेति ३६ लिङ्गाच्च ३७ तेषां पूर्वेद्युः सम्मानं यथा प्रकृतौ ३८ सद्यो वा प्रकृतावर्थलक्षणत्वाद्यथाऽऽज्यस्य पशौ विभागः ३९ तेषां पूर्वेद्युः सम्मानमेके अधीयते तदहर्गणे तन्त्रं स्यात् ४० सद्यः सम्मानमभ्या वर्तेतार्थलक्षणत्वाद्यथाहवनीयसम्मार्जनम् ४१ एतेन सवनीयरशना व्याख्याताः ४२ तन्त्रं वा साधारणत्वाच्छेदनस्य यथा प्रकृतौ तस्य कालोत्कर्षः ४३ अग्रेणाहवनीयं प्राञ्चः सम्मीयेरन् दिक्संयोगात् ४४ उदञ्चो वा अर्धमन्तर्वेद्यर्धं बहिर्वेदीति विज्ञायते ४५ लिङ्गाच्च ४६ तेषामन्तराले यथाकामी न नियमः श्रूयते ४७ इष्टं वचनमेतेषाम् ४८ तथा वेदिसंमितां मिनोतीति ४९ न विकल्पोऽविप्रतिषेधात् ५० यथापूर्वमग्निष्ठदेशमीप्सेयुः मुख्यसाधर्म्यात् ५१ लिङ्गाच्च ५२ उदगपवर्गा यूपा भवन्ति दक्षिणापर्गाः पशवः इत्येतेषां पौर्वापर्यविधिः । तेन मन्यामहे द्वावुत्तमौ दक्षिणोत्तराधौं मिनुयात् एवं भूयिष्ठा यथासमाम्नानं भवन्ति ५३ उपरसम्मितां मिनुयात् पितृलोककामस्य मध्येन सम्मितां रशनसम्मितां च मनुष्यलोककामस्य चषालसम्मि-तामिन्द्रियकामस्येत्यायामतः उपराणि सामान्यानि स्युः तिर्यक्तो मध्यानि रशनाश्च प्रथिम्नश्चषालान्येवमर्थोक्तानि भवन्ति ५४ तामेतामतिरात्रचरम आलभेतेति व्यत्यस्तपशोर्वादः सन्निधानात् ५५ येयमितरा तामिमां प्रजा आपद्य चरन्तीति प्रसृतपशोर्वादो व्यपदेशात् ५६

इति संकर्षकाण्डे प्रथमाध्यायस्य चतुर्थः पादः

समाप्तश्चायं यूपपादः
मीमांसाक्रमेण चतुर्दशाध्यायस्य

द्वितीयाध्यायस्य प्रथमः पादः

इष्टकाभिरग्निं चितुत इति मृन्मय्यः स्थण्डिलकर्मणि श्रूयन्ते यथा लोके १ वाक्यशेषाच्च २ अश्रिमत्यः शब्दसंयोगात् ३ समचतुरश्राः शब्दैकसमधिगम्यत्वात् ४ अमृन्मयीनामिष्टकाकर्मार्थसंयोगात् ५ आकृतिनियमाद्वाऽन्तरालानि ६ वर्णपृथक्त्वं शब्दसंयोगात् ७ रेखाधिकारो वा प्रकरणात् ८ तासां पाके यथाकामी यथा लोके ९ पक्वा वा तद्विशेषविधानात् १० वचनपक्षे वाऽप्रतिषेधः ११ अग्निने- ष्टकाः पचतीत्येकेषां वाऽऽहत्यविधिः १२ स वैहारिकः प्रकरणात् १३ लौकिकेन वाऽनिर्देशात् १४ मृन्मयीनामिष्टकाशब्दः तासामेतन्नामधेयं यथा लोके १५ सर्वेषां वा सर्वगामित्वात् १६ लिङ्गाच्च १७ सिकतासु तयादेवतं सङ्ख्या चाद्रियेत १८ सिकतासु न सङ्ख्यादि कर्तव्यं विप्रतिषेधात् १८-२ चित्यसंयोगाच्च १९ चरुसर्वौषधमनि- ष्टकम् २० नैर्ऋतेष्टके इष्टकाशब्दविधानात्तयादेवतं स्यात् २१ न वा स्यान्निधानस्याविवक्षितत्वात् २२ साहस्रं चिन्वीत प्रथमं चिन्वान इति क्रत्वधिकारोऽग्निसंयोगात् यथा सहस्रेणेजान इति २३ अग्न्यधिकारो वा चयनसंयोगात् यथा जानुदघ्नं चिन्वीत प्रथमं चिन्वान इति २४ दक्षिणाभिः साहस्रः यथा क्रतवः २५ इष्टकाभिर्वा द्रव्यसन्निधानात् यथा साहस्रः प्रासाद इति २६ साहस्रे शब्दसंयोगात् २७ सर्वेषु वा समरिहाणात् श्रूयते यथा शतार्धः पुरुष इति २८ सहस्रेष्टकमग्निं चिन्वीतेति लोकंपृणा मन्त्रपरिमाणान्नाना मन्त्राः उभयस्य साहस्राः तदेतस्मात् विप्रतिषिद्धम् २९ सर्वेषां वाऽग्निद्रव्याणां परिमाणविशेषात् तत्र वचनाच्छेषो यथा चतुर्दशभिर्वपतीति ३० इष्टकाविवृद्धौ तद्व्या- ख्यातम् ३१ समशः प्रतिविभज्य पूर्वैः पूर्वाणि कुर्यात् उत्तरैरुत्तराणीति लोकं पृणाया अयातयामश्रुतेः ३२ चितिशब्दः प्रस्तारे यथा लोके ३३ लिङ्गाच्च ३४ पुरीषव्यवायाद्वा चितिपृथक्त्वं कर्मणि विभागात् ३५ गणेषु रीतिवादो यथा लोके प्राच ओदनान्निधेहीति ३६ लिङ्गाच्च

३७ पश्चात्प्राचीमुत्तमामुपदधाति इति त्वेकत्वान्मुखवादः ३८ वाक्य-शेषाच्च ३९ प्राञ्चमिति कर्तुर्मुखवादः शेषत्वात् ४० पुरस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्यपवर्गवादो व्यपदेशात् ४१ चित्यां चित्यां ऋषभमुपदधातीति पशुशब्दः श्रूयते ४२ इष्टका वा मन्त्रवर्णेन द्रव्यसन्निधानात् यथा सृष्टीरुपदधातीति ४३ एतेन मन्त्र-लिङ्गा व्याख्यातव्याः ४४ तद्द्रव्याणि गुणसंयोगाद्यथा पुष्करपर्ण-मुपदधातीति ४५ विकर्णीं पञ्चचोडां मण्डलेष्टकामित्याकृतिनियमः शब्दसंयोगात् ४६ न वा चयनार्थत्वात् ४७ मध्यमायामुपसद्यग्निश्चीयेत प्रकृत्युपसंबन्धात् प्राकृते यथा समाम्नानं तत्प्राकृतवैकृतैर्व्याख्यातम् ४८ अनुपसदमग्निश्चीयत इति एकेषामाहत्यविधिः ४९ इष्टकाकर्मणि यथाकाम्यं प्रतीयेत ५० नवा दीक्षितस्योख्यभस्मसंसर्गात् ५१ तन्मासप्रभृतिदीक्षाकल्पेष्विति बादरायणो । मन्यते स्म ५२ प्रति-षेधाच्च ५३ त्रिः पराध्योऽग्नेराहारः ५४ यथाकामी वाऽन्येषां कर्मणाम् ५५ लिङ्गाच्च ५६ तस्यैतान्येवोर्ध्वप्रमाणान्यनाम्नानात् ५७ तस्येष्टका मन्त्रपरिमाणास्तद्व्याख्यातम् ५८ यदृषीणामाग्नेयमिति याज्ञसेनीः प्रत्युपबन्धात् ५९ वाक्यशेषाच्च ६० दाशतयीभ्यो वा ऋषिसंयोगात् ६१ याज्ञसेनीः स्वस्थानाः प्रवर्धेरन् यथोपसदः ६२ कृत्स्नस्य वा विकारोऽग्निसंयोगात् ६३ दाशतयीभ्यो यावदर्थमागमयेत् यथा गायत्रीषु स्तुवत इति ६४ सर्वेषां तद्व्याख्यातम् ६५ यथाद्रव्यसन्निधि मन्त्रसंयोगात् यथा सामिधेनीविवृद्धौ काष्ठानि ६६ प्रतिसूक्तं वचनात् ६७ यदृषीणामाग्नेयं तेन संवत्सरमग्निं चिन्वीतेति चयनसंयोगात् ६८ गायत्रचितं चिन्वीतेत्येवमादयः कर्मसंयोगास्तद्व्याख्यातम् ६९ शीर्षवानग्निर्वयसां प्रतिमाश्रुतेः ७० मन्त्रवर्णाच्च ७१ लिङ्गाच्च ७२ धर्मिणांते तु समर्हणा यथा प्रतिरूप्यम् ७३ त्रिवृता शिरसि स्तुवत इत्येतेन व्याख्यातम् ७४ सुपर्णो नित्यो मन्त्रवर्णात् ७५ साधारणलिङ्गो वाऽविशेषात् ७६ प्रशंसा मन्त्रवर्णः यथा हिरण्यपक्षश्शकुनो भुरण्युः इति ७७ श्येनचितिर्नित्यकाम्यो यथैन्द्रवायवे ७८ विशेषो वा अमुं पुरुषं लिखेति ७९ लोकं पृणासूददोहाभ्यां प्रतिमन्त्रमुपधानं तद्व्याख्यातम् ८० विनियोगे नानार्थत्वात् समुच्चयः सन्निपातित्वात्

८१ लिङ्गाच्च ८२

इति सङ्कर्षकाण्डे द्वितीयाध्यायस्य प्रथमः पादः

अथ द्वितीयः पादः

हृदयशूलं तस्य वहति तन्नाग्नीषोमीये करोति न सवनीये अनूबन्ध्यायां करोति सोन्ववेत्यविधिः १ सर्वेषां वा श्रपणादुद्वासनाधिकारप्रतिषेधः २ मन्त्रवर्णाच्च ३ स यूपो मन्त्रवर्णात् ४ लिङ्गाच्च ५ बर्हिः समिध इति इध्माग्निः पौर्णमासीति च एतेन व्याख्यातानि प्रकरणात् ६ शब्दसामान्यं वा प्रकरणे कर्माणि तत्प्रकरणे शेषाश्चोद्यन्ते ७ पार्वणेन कालोऽभीज्येत शब्दसंयोगात् ८ कर्माभिज्या वा तुल्यशब्दानां प्रकरणविशेषात् उत्तरस्यां ततौ कर्मप्रयोगो न विद्यते विप्रतिषेधात् १० सोमे दर्शपूर्णमासप्रभृतीनां याजमानं न विद्यते यज्ञो बभूवेत्यर्धोक्ते श्रूयते सा परिसङ्ख्या । यथा आज्यभागौ यजति इति गृहमेधीये ११ स्तुतशस्त्रयोस्त्वनुमन्त्रणार्थमामनन्ति तत्संयोगपृथक्त्वं यथा पञ्चावत्ते १२ चतुरवत्तं जुहोतीति सर्वेज्यानामविशेषात् १३ अदर्विहोमानां वा लिङ्गात् १४ पञ्चावत्तं जमदग्नीनामिति सर्वेषामविशेषात् १५ स्या-च्चतुरवत्ते तस्यैव लिङ्गदर्शनात् १६ पञ्चमावत्तमाज्यात् संख्यासंयोगात् १७ औषधाद्वा तत्संप्रदानेनाभिप्रेतम् १८ लिङ्गाच्च १९ अन्ततः क्रमसंयोगात् पञ्चमशब्दश्चाविप्रतिषिद्धः २० पुरस्ताद्वाऽभिघारणात् संस्कारार्थमभिघारणम् संख्यार्थः पञ्चमशब्दः २१ पश्चार्धात् तृतीयं पञ्चावत्तिनः क्रमसंयोगात् २२ आवापस्विष्टकृतो द्वितीयं पञ्चावत्तिनः २३ सकृदुपहतेन वनस्पतिं यजतीति संस्कारप्रतिषेधः शब्दसंयोगात् २४ कर्म वा संसर्गार्थनिवृत्तत्वात् २५ यदपरमवदानं तत्पूर्वमिति देशतः कालतो वोभयस्य भागित्वात् २६ कर्मतो वा कर्मलक्षणत्वादवदानस्य २७ पूर्वपूर्वाण्यवद्येज्ज्येष्ठस्य ज्यैष्ठिनेयस्य यो वा गतश्रीः स्यात् यो वा पुरोधाकामः स्यात् अपरपूर्वाण्यवद्येत् कनिष्ठस्य कानिष्ठिनेयस्य इत्येनेन व्याख्यातम् २८ षोडशान्याज्यानि भवन्तीत्येकेषां स विकल्पो विप्रतिषेधात् २९ समस्यवादौ वा यथा चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति

३० सप्तदशानि पशुकामस्य गृह्णीयादित्येतेन व्याख्यातम् ३१ दर्शपूर्णमासयोर्व्यपदेशात् तद्विधानात् ३२ तेषां पृथक्कृतानां निरवदानं यथाऽन्येषां हविः पृथक्त्वात् ३३ वचनात् सर्वेषां सहावदीयेत नहि वचनं किञ्चिद्बुभूषति ३४ तेषां सहप्रदानमवदानैकत्वात् ३५ नाना वा देवतापृथक्त्वात् ३६ अन्यार्थदर्शनाच्च ३७ एककपाले वैश्वानर्यां वपायां वा अवदानसंपत्क्रियेत प्रकृत्युपबन्धात् ३८ प्रतिषेधान्निवर्तते ३९ त्र्यङ्गाणामर्धस्य पृषदाज्यस्य च प्रत्यभिघारणं न विद्यते शेषकार्यतयाऽर्थे श्रूयते ४० विद्यते हविस्संस्कारत्वाद्धेतुमात्रमितरत् यथा दीक्षामोचनं नक्तं संस्थापनस्य ४१ पशोः प्रदानं यथा प्रकृतौ ४२ एककालानि वा लिङ्गदर्शनात् ४३

इति सङ्कर्षकाण्डे द्वितीयाध्यायस्य द्वितीयः पादः

अथ तृतीयः पादः

यजेतीज्यासम्प्रैषः शब्दसंयोगाद्यथा पचेतिवचनानि येयजामह इति प्रतिश्रवणे यथा अहं तु पक्ष्यामि इति १ लिङ्गाच्च २ प्रजापतिर्यज्ञमन्वेतीत्यत्र देवतानामादेशो न विद्यते अनाम्नानात् ३ विद्यते वाऽन्यार्थदर्शनेभ्यः आश्राव्याह देवान् यजेति अथ इन्दायानुब्रूहि इन्द्रं यजेति ४ आम्नातः प्रयाजेषु देवतादेशः तस्य प्रतिषेधो वचनम् ५ वचनानीतराणि स्युः अर्थवत्त्वात् इतरथा वादमात्रं अनर्थकं स्यात् इति ६ आम्नातो वैकेषां तद्दर्शयति अमुष्मा अनुब्रूह्यमुं यजेति ७ देवान्यजेत्यनूयाजेषु साधारणो बहुशब्दः श्रूयते ८ प्रथमस्य वा स्थानात् ९ उत्तमयोश्च प्रैषाम्नानात् १० शब्दविप्रतिषेधान्नेति चेत् पाशवत्स्यात् ११ प्रथमे विप्रतिषेधाद्वा साधारणः १२ क्रमात् पृथक् स्वलिङ्गात् सर्वेषां क्रमाच्च लिङ्गं बलवत्तरम् १३ असन्निपातित्वात् उपरवे सन्निपातित्वम् १४ संस्कारत्वात् द्विर्वचनेऽप्रतिषेधः १५ लिङ्गाच्च १६ एकादश प्रयाजान् यजति एकादशानूयाजान् यजतीति समशः स्वस्थाना विवर्धेरन् क्रमानुग्रहात् यथोपसदः १७ दशमं बर्हिरनूयाजेषु तदुत्तमस्य स्थानात् १८ प्रथमस्य वा देवतासामान्यात्

तदकर्मलिङ्गमितरत् १९ चतुर्थोत्तमयोर्वा स्थानात् २० एककर्मणा सामिधेनीसंयोगं बादरायणः तत्र विशेषो नोपलभ्यते तदुक्तं सामिधेन्य इति २१ पश्वनूयाजेषु मैत्रावरुणः प्रेष्यति स वैशेषिकस्य स्थानात् २२ प्रथमस्य वा शब्दसामान्यादुभयत्र देवताशब्दः श्रूयते २३ उपप्रेष्य होतर्हव्या देवेभ्य इति प्रैषस्य प्रैषो यावदाम्नातं शब्दपूर्वत्वात् २४ अध्रिगुप्रैषो वा तेनापदिश्येत यथा अमृतमसि प्राणायत्वेति हिरण्यमभिव्यनिति इति २५ प्रैषो वा व्यपदेशात् २६ होतारं ब्रूयाच्छब्दसामर्थ्यात् २७ मैत्रावरुणं वा व्यपदेशात् २८ लिङ्गाच्च २८ उक्थशा यज सोमस्येत्यन्येषां स्तुतशस्त्रवतां सोमानामाह अनुब्रूहि प्रेष्येति होतारमाहेत्युभयलिङ्गानां शब्दसंयोगात् २९ शस्त्रवतां च नानार्थानां समासवचनम् यथा उक्थौयाकरणानानयेति शब्दः स्तुवतां आज्ञस्यात् ३० बहुशब्दो गणेषु शब्दसंयोगात् शेषमितरे चतुरवत्तम् ३१ तां पुरोऽध्वर्युर्विभजति मैत्रावरुणः पश्चादिति देशतः कालतो वा उभयस्य भागित्वात् ३२ देशतो वैष वादः स्यात् वषट्कारेणाहवनीयं गच्छतीति गमनसंबन्धात् ३३ ऋतुग्रहणेषु अध्वर्युः समाख्यानात् ३४ ऋतुग्रहे मैत्रावरुणो विभजते ३५ पुनरभ्युन्नीतेषु मैत्रावरुण उच्येत प्रकरणात् तस्माद्धोतृशब्दो यथा यदप्रतिरथं द्वितीयो होतान्वाहेति ३६ होता वाऽग्निष्टोमचमसेषु शब्दसंयोगात् शेषोऽनारभ्यवादः तद्व्याख्यातम् ३७ आश्रुतप्रत्याश्रुते संप्रैषश्चानुवषट्कारे न विद्यते अनुवषट्करोतीति तु विप्रकर्षे नोपपद्यते ३८ विप्रतिषिद्धास्त्वेकेषां नाश्रावयतीति ३९ न नित्यानुवादो वा न्यायसन्निधानात् ४०

इति सङ्कर्षकाण्डे द्वितीयाध्यायस्य तृतीयः पादः

चतुर्थः पादः

देवतायोगेन प्रदानात्मके चोद्यमाने आहुतिर्यथा लोके १ लिङ्गाच्च २ अदेवतासंयोगेन चौद्यमानेऽर्थगृहीता देवता तत्संयोगे जुहोतिशब्दो यथा भोजनशब्दो मनुष्यसंयोगे ३ सूक्तवाक एव याज्या प्रस्तरप्रहरणमाहुतिरिध्मः प्रथममाहुतीनां हूयत इत्येतेन व्याख्यातम् ४ प्रशंसा वा संस्कारः प्रस्तरस्य सन्निधानात् ७ अज्यानीरेता

उपदधातीत्याग्रयणं निरुप्यैता आहुतीरिति तत्संयोगपृथक्त्वम् ८ चित्रया यजेत पशुकाम इत्युक्त्वा अथैता आहुतीर्जुहोत्येते वै देवता पुष्टिपतयः तयैवास्मिन् पुष्टिं दधाति अग्ने गोभिर्न आगहि इन्दो पुष्ट्या जुषस्व नः इन्द्रो धर्ता गृहेषु नः इत्येतैर्मन्त्रैर्जुहुयात् आनन्तर्यात् पुष्टिशब्दश्चोभयत्र श्रूयते ९ दर्विहोमे सकृद्गृहीतमर्थापत्तेः १० लिङ्गाच्च ११ गणेषु चतुर्गृहीतं समवायाद्यथा ध्रुवायाः १२ प्रत्याहुति वा प्रदानसंयोगात् १३ तत्र समासे वचनं क्रियेत कर्मविभागात् १४ समिदाधानं न विद्यतेऽनाम्नानात् १५ समिधं प्रत्याहुति दर्शयति १६ पाकयज्ञशब्दस्सर्वयज्ञानामविशेषात् यथाऽऽहुतिशब्दः १७ केषांचिद्व्यपदेशात् १८ सर्वदर्विहोमानां स्याल्लिङ्गसंयोगात् १९ सर्वेषामविशेषात् २० लौकिकानां वा तेषां एतन्नामधेयम् २१ लिङ्गाच्च २२ धर्मोपदेशो विप्रतिषेधात् यथावदेतत् २३ प्राचीन-प्रवणे यजेतेत्यधिकरणनिर्देशः स्यात् २४ लिङ्गाच्च २५ पदे जुहोति वर्त्मनि जुहोति वल्मीकवपायां जुहोतीत्येतेन व्याख्यातम् २६ अग्निविकारा वा जुहोतिसंयोगेन चोद्यमाने अर्धशब्देन विधीयन्ते यथा उत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमायेति देशशब्देन विधीयन्ते २७ चतुष्पथे जुहोतीत्यनेन व्याख्यातम् २८ प्रशंसा वा अग्निवत्येव जुहोतीति यथा ब्राह्मणवान् ग्राम इति ३० प्रत्यञ्चोऽवभृथेन चरन्तीति प्राङ्मुखाः कर्माणि कुर्युः तद्व्याख्यातम् ३१ तद्व्याख्यातम् ३२ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा इति मन्त्रान्ताम्नातः स्वाहाकारः प्रदानार्थत्वात् तौ ह्यर्थौ श्रुत्या संयुज्येते ३३ पुरस्तादपि मन्त्राः श्रूयमाणाः तदर्थाः प्रदानसंयोगात् यथा देहि ब्राह्मणाय ब्राह्मणाय देहीति ३४ आम्नायाच्च ३५ स्वाहाकृत्य ब्रह्मणा ते जुहोमि स्वाहाकृतमिति प्रयतं जुहोमि स्वाहाकृतमिन्द्राय ते जुहोमि स्वाहाकृतः पुनरप्येति देवान् इत्येतेन व्याख्यातम् ३६ अप्रदानार्था वा स्तुत्यर्थः श्रूयते ३७ वषट्ते विष्णवास आकृणोमीत्येतेन व्याख्यातम् ३८ स्विष्टकृद्विकारे या-ज्यायां देवतानिगमाः स्युः प्रकृत्युपबन्धात् ३९ उपलक्षणप्रधाना-स्तूपलक्षिताः पुनः प्रैषे ४० स्वाहेत्यालेखनः प्रदानकर्मा चतुर्थी-विभक्तेः ४१ यथासमाम्नानमित्याश्मरथ्यः प्रवचनलक्षणत्वान्मन्त्राणाम्

४२ चित्ताय स्वाहा चित्त्यै स्वाहेत्येकेषां विकल्पो विप्रतिषेधात् ४३ भूतानामवेष्टिभिरिष्टका उपदध्यात् अर्थवादसामान्यात् ४४ अग्नौ वा येऽब्राह्मणा मन्त्रास्तद्व्याख्यातम् ४५ नानार्थयोरर्थवादसामान्यं यथा क्रतुषु पृथक्त्वम् ४६ एतेन तुल्यशब्दत्वं व्याख्यातम् ४७ मन्त्रागमे सस्वाहाकारः प्रतीयेत वाक्यसंयोगात् ४८ अस्वाहाकारा वा प्रदानार्थस्वाहाकारेभ्यः ४९ स्थितं तावदपर्यवसितम् । प्रप्रैषेण यजतीत्येतेन व्याख्यातम् ५० स्थितादुत्तरम् । स्याद्वा इष्टकासु स्वाहाकारो यथा मुष्टिकरणे ५१ ऋताषाडृतधामेति यथार्थविनिष्कर्षोऽर्थपृथक्त्वात् यथा सूक्तवाकानाम् ५२ यथासमाम्नानं वा व्याख्यातम् ५३ षड्जुहोतीति पर्यायवादो यथा सावित्राणि जुहोतीति ५४ भुवनस्य पत इति सप्तमीमाहुतिं जुहोतीति ५५ भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोतीति दशेत्येकेषां दर्शनात् पञ्चस्ववयुत्यवादो यथा षड्भिरुपतिष्ठते इति ५६ स्वाहाकारवषट्कारनमस्काराः प्रदानार्था यथान्यत्र ५७ अप्रदानार्था वाक्यसंयोगात् यथा मुष्टिकरणे स्वाहाकारः स्वाहाकारः ५८

इति सङ्कर्षकाण्डे चतुर्थः पादः अध्यायश्च परिसमाप्तः

अथ तृतीयाध्यायस्य प्रथमः पादः

विक्रमसन्निपातौ दर्शपूर्णमासयोः इज्याकालस्तत्संयोगात् १ द्वाविज्याकालौ वचनात् २ रात्रौ यज्ञे शब्दसंयोगात् ३ अहनि वा तद्व्याख्यातम् ४ प्रक्रमाभिधानाद्रात्रिशब्दो यथाऽन्यत्राहोरात्रसम्मितः पञ्चाहेनागतः इति ५ लिङ्गाच्च । उदिते सूर्ये तन्त्रप्रक्रमः प्रधानसंयोगात् ६ यजनीये वा तद्व्याख्यातम् ७ एतेन सोमकालो व्याख्यातः ८ विक्रमसन्निपातयोर्वा स्यात् तत्संयोगात् न ह्यन्यत् प्रत्यक्षं विद्यते ९ यदि मन्येत त्वपूर्णामिति नान्यद्धविरन्तरं निर्वपेत् पौर्णमासीमेव यजेत श्वोभूत इति सर्वेष्टीनामविशेषात् १० दोषसंयुक्तानां वा कल्पत्वात् ११ न यवानां आग्रयणं विद्यत इत्यौडुलोमिः तासामितरेणेत्येकवच्छ्रूयते १२ उभाभ्यामाग्रयणेनेति प्रत्यक्षश्रुतेः १३ सर्वेषां प्राशन्यो यथा भक्षाणामविशेषात् १४ मन्त्रवतां वा १५ अनिष्टाग्रयनस्य नवाशन-

प्रतिषेधः आरण्यफालकृष्टानां वाक्यसंबन्धात् ग्राम्याणां न स्यात् १६ वाक्यसंयोगाच्च १७ ग्राम्यारण्यव्यपदेशो वा फालकृष्टाभि-राख्यातं लभेदन्यथा सर्वग्राम्याणां पृथग्व्यपदेशः स्यात् प्रत्य-क्षत्वादारण्याभिधानस्य १८ शाकपक्वौषधीनां प्राशने यथाकामी स्यात् १९ लिङ्गाच्च २० तेन शमीधान्यं व्याख्यातम् २१ प्राशिते-ऽग्नीनादधानो न कृतप्रसवत्वात् २२ अविद्यमानोऽभोक्ष्यमाणश्चाधि-कृतौ सस्यसंयोगात् २३ अत्राग्रयणाभ्यासः प्रकरणात् २४ दर्शपूर्ण-मासयोरन्तरालसंयोगान्न ह्यन्यदन्य क्रमं विद्यते २५ स विकल्पः स्यात् व्रीहियवयोर्यथाग्निहोत्रे २६ स षण्मासादध्यधिभवेत् २७ लिङ्गदर्श-नाच्च २८ सस्यपक्तेर्वाऽविप्रतिषेधात् २९ पार्वणमासानि विज्ञायन्ते ३० त्रिंशद्वै सावनस्य विप्रतिषेधात् पार्वणस्य यथा यद्येतान्नालभेत इति ३१ मासो वा ३२ द्वौ पराविष्ट्वा तृतीयमुत्सृजेदिति अनन्तरं यथा पुर-स्तात् ३३ आदेर्वा कर्मणोऽपवर्गात् ३४ विज्ञयते च स त्रिषु त्रिषु संवत्सरेषु मासमुत्सृजेदिति । तेन मन्यामहे एतद्वचनमभ्यासो विप्रतिषेधात् यथा दाक्षायणयज्ञे ३५ पञ्चसु चातुर्मास्येषु वैश्वानरपा-र्जन्ये पञ्चहोता च नापद्यन्ते एकोपक्रमत्वात् यथा आरम्भणीया ३६ यदि वसन्ता यजेत द्विरुपस्तृणीयात् द्विरभिघारयेत् ओषधयो वै शब्द ओषधी-ष्वेव पशून् प्रतिष्ठापयति यदि प्रावृषि यजेत सकृदुपस्तृणीयात् द्विरभिघारयेत् द्विष्या पशून् अभिजिघन्तीति वैश्वदेवस्य प्रकरणात् ३७ वरुणप्रघासानां लिङ्गसंयोगात् यथा विप्रतिपन्नेषु ३८ वैश्वदेवेन पशुकामो यजेत यस्मिन् ऋतौ प्रभूतं गोषु पयः स्यादिति सर्वमविशेषात् ३९ वसन्तानां वा तस्य कालत्वाद्वैश्वदेवस्य यथा यस्मिन् ऋतौ बहुव्रीहिः स्यात् तस्मिन् यष्टव्यमिति वसन्त एव यजेत ४० वैश्वदेवस्य कालाभ्यासः प्रतिषेधे न विधीयते ४१ वैश्वदेवस्याभ्यासः विहितस्य स्थाने कालोत्कर्षः ४२ मासमग्निहोत्रं जुह्वति मासं दर्शपूर्णमासाभ्या-मिति स्वकालः स्यात् प्रकृत्युपबन्धात् ४३ अहरहर्वा चोदितत्वात् यथा त्रिवृता मासं ततः अहरहः सकृदग्निहोत्रं हूयेत ४४

इति सङ्कर्षकाण्डे तृतीयस्य अध्यायस्य प्रथमः पादः

कालपादः समाप्तः

द्वितीयः पादः

तत्सर्वार्थमविशेषात् १ गार्हपत्यार्थं ब्राह्मौदनिकं स्यात् गार्हपत्येन संवत्सरमासीतेति तत्संयोगात् २ लोकत इतरे यथान्यानि द्रव्याणि ३ गार्हपत्याद्वा आहवनीयो लिङ्गात् ४ आहवनीयात् सभ्यावसथ्यौ ५ पृथक्प्रकल्प्येतां वा शब्दपृथक्त्वात् यथा ऋत्विजः ६ आम्नातं दक्षिणाग्नेः ७ निर्मन्थ्यात् दक्षिणाग्निमादधीत इत्येकेषां दर्शनम् ८ व्याख्यातं धारणम् ९ अनुगच्छेद्वाऽऽहवनीयो लिङ्गात् १० प्रत्यर्थमाधानमिति ११ तुल्यश्रुतित्वाद्वा इतरैराहितस्य धारणयोगात् वचनाद्यथा समारोप्य १२ दक्षिणाग्नेरेतेन व्याख्यातम् १३ पूर्वं गार्हपत्यादाहवनीये उद्धृते पुनरनुगते तत वोद्धियेत तद्गतत्वात् १४ लिङ्गाच्च १५ अहोमार्थेष्वाहवनीयः श्रूयमाणोऽनवेतः शब्दनित्यत्वात् १६ अपवृत्ते कर्मणि धार्यमाणो लौकिकोऽर्थसंयोगात् यथा समारूढे १७ लिङ्गदर्शनाच्च १८ एतेन सोमो व्याख्यातः १९ दीक्षणीयाग्निर्धार्येत संस्कारयोगात् देवतापरिग्रहणं श्रूयते २० लिङ्गदर्शनाच्च २१ तदुत्तरवेद्यां कृत्स्नं प्रणयेद्धोमसंयोगात् स आहवनीयः २२ शेषं वा कुर्याल्लिङ्गात् २३ आहवनीयविभागस्स पुरस्तादुद्ध्रियते २४ गार्हपत्यो वा शेषो लिङ्गात् २५ आहवनीयविभागः स पुरस्तादुद्ध्रियते। गार्हपत्य एव तच्छ्रूयते। सर्वेषां गार्हपत्यानामविशेषात् २७ श्रुतिभूतानां दार्शिकप्रकृतेश्चाधिकारात् २८ लिङ्गदर्शनाच्च २९ आहवनीयात् विहरेद्धोमसंयोगात् ३० शालामुखीयाद्वा देशसंयोगात् ३१ आहवनीयात् धिष्णियान् विहरेद्धोमसंयोगात् ३२ आग्नीध्रीयाद्वा आम्नायतः ३३ अनुसवनं सवनसंयोगात् ३४ चतुर्थं वा अग्निष्टोमसामलिङ्गात् ३५ अनुसवनं व्याघारणमविशेषात् प्रत्यङ्ङासीनो धिष्णियान् व्याघारयतीति ३६ तृतीयसवने चाविशेषलिङ्गात् ३७ विप्रतिषिद्धो वा एकवाक्ययोगात् कालहविषोरिति बादरायणः ३८ तस्मात्तेषु जुह्वतीत्यर्थः ३९ तेषां वायव्यं पात्रं चमसो वा प्रकरणात् यथा शूर्पेण जुहोतीति ४० सोमे होमेष्वाज्यं हविश्चोदनापृथक्त्वात् ४१ लिङ्गाच्च ४२ स वैव स्यादित्याहवनीयस्यायं वादः ४३ प्राजहितस्य वाऽपदेशात् अर्थवादप्रतिषेधाच्च ४४ पशौ शालामुखीयः स तदर्थः प्रकृतौ न सोमे

गार्हपत्यकर्म विद्यते ४५ पश्चिष्ट्यामाहवनीयो धार्येत संस्कारसं-योगात् स दीक्षणीयया व्याख्यातः ४६ पूर्वेद्युः काले पशावुत्तर-वेदिकेऽग्निहोत्रं जुहुयादाहवनीयत्वात् ४७ अग्निहोत्रस्य शालामुखीये श्रपणं प्रसङ्गात् ४८ प्राजहिते विद्यमानत्वात् ४९ शामित्रे पशुपुरो-डाशस्य श्रपणं प्रसङ्गात् ५० शालामुखीये प्रयुक्तत्वाद्द्रव्यस्य प्रयुक्ते प्रसङ्गात् ५१ द्व्यहे त्र्यहे उत्तरवेदिः क्रियेत प्रकृत्युपबन्धात् ५२ स्वकालत्वात् सद्यस्काल एव पशुः वरुणप्रघासश्चोत्तरवे-द्यामग्निहोत्रं सञ्चष्टे ५३ पशुवरुणप्रघासेषु दर्शपूर्णमासविकारत्वा-च्छालामुखीयो न स्यात् ५४ विद्यते तद्व्याख्यातम् ५५ संस्थिते सोमे शालामुखीयाग्नीध्रीयोत्तरवेदिकाः समारोप्य नित्यं धार्यन्ते ५६ अनुगतेषु प्रायश्चित्तमाम्नातम् ५७ प्राजहितं वा सर्वार्थत्वात् आधानस्य सोमलक्षणं इतरेषां तत्सोमापवर्गेऽपवृज्येरन् यथाऽग्निहोत्रादुद्धरणम् ५८ गतश्रियश्शालामुखीयं नित्यत्वात् ५९ दीक्षिताग्नेः समारोपणं न विद्यते अग्निहोत्रानन्तर्यात् तत्पुनः प्रतिषिद्धं तस्य ६० विद्यते चाप्रयाणसंयोगात् ६१ प्रत्यग्न्यरणि भेदो द्रव्यपृथक्त्वात् ६२ लिङ्गाच्च ६३ अरणिभ्यामित्येकेषां स विकल्पो विप्रतिषेधात् ६४ इतरस्य वा धर्मविधित्सा यथा रथाङ्गेन तरन्तीति ६५ उख्याग्नेर्न समारोपणं पात्रसंयोगात् ६६ अपरयोस्तु विद्यते विप्रतिषेधात् ६७ आत्मसमारोपणे अरण्योश्च विकल्पो विप्रतिषेधात् ६८ एकार्थत्वात् समुच्चयः विप्रतिषेधाद्विकल्प इति ६९ आत्मसमारूढे विप्रतिषेधात् ७० एकार्थत्वाद्वा नियम्येत श्रुतेरविशिष्टत्वात् ७१

इति सङ्कर्षकाण्डे तृतीयाध्यायस्य द्वितीयः पादः

अग्निपादस्समाप्तः

अथ तृतीयाध्यायस्य

तृतीयः पादः

अतिग्राह्यास्समानविधानास्तद्व्याख्यातम् १ विश्वजिति सर्वपृष्ठे ग्रहीतव्या अप्यग्निष्टोमे इत्यपि विश्वजितो वादेन विश्वजित्त्वेन व्यपदि-श्यते २ स प्रकृतिगःप्रकरणात् संबन्धेऽनारभ्यविधिः ३ विकल्पो

वा पृष्ठ्यशब्देन विधीयते ४ द्व्याश्रयविकल्पः स्यात् ५ समाने वा कालेऽविच्यावनशब्दोऽविप्रतिषिद्धः ६ वैराजस्य स्तोत्रायाग्नेयो गृह्यत इति देवताविकारश्चतुर्थीसंयोगात् ७ अङ्गविधिर्वा यथा क्वास्य रथस्य पुरुष इति ८ कालवादो यथा प्रातस्सवनेऽतिग्राह्या गृह्यन्त इति ९ प्रातस्सवने गृह्यन्त इति कालवादान्तरं ग्रहणोक्ता गृह्यन्त इत्येकेषाम् १० देवतानानात्वात् न ह्यन्यदेवत्यानां याज्यानां देवतापृथक्त्वात् ११ समानयाज्या वाऽनुहूयन्त इत्यर्थसमवायेनोपपद्यते १२ दधिग्रहो नित्यस्तद्व्याख्यातम् १३ आदितो गृह्येत क्रमसंयोगात् १४ ज्येष्ठ-शब्दाच्च १५ न वा मन्त्रक्रमबलीयस्त्वात् ज्येष्ठशब्दो यथा ज्येष्ठमेव गच्छतीति १६ लिङ्गाच्च १७ उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीति ग्रहणे लिङ्गत्वं मन्त्रे ग्रहणलिङ्गात् १८ अपेन्द्रद्विषतो मनोपजिज्यासतो जहि इत्ययमपि तत् १९ प्राणाय त्वा-ऽपानाय त्वा व्यानाय त्वेति होमलिङ्गात् २० कामसंयोगस्तद्व्याख्यातम् २१ नित्ये कामो यथा ऐन्द्रवायवे २२ सोमग्रहो दधिकृतस्सोमधर्मै नैमित्तिकत्वात् २३ दधिग्रहविकारत्वाच्च २४ तत्रार्थग्रहणोऽभिषवः पात्रसंयोगात् २५ तिस्रो बह्वस्य समिध इत्येतया सोमं करोतीति प्रत्यक्षस्य सतः सोमस्य क्रिया नोपपद्यते २६ कर्मसंयागाद्वा करणीयं यथा हिरण्यकारः २७ अंश्वदाभ्यवाक्यं चोर्ध्वमवृभृथात् विद्यते क्रियेत चोर्ध्वमवभृथात् अथवौपानुवाक्ये तस्येतरश्शेषोऽखिलविधानात् पशुशिरसां त्रिंशद्वाक्ये तद्व्याख्यातम् २८ लिङ्गाच्च २९ भ्रातृव्यवता-ऽदाभ्यो ग्राह्यो बुभूषतांऽशुरिति कामसंयोगस्तद्व्याख्यातम् ३० नाना-र्थानां समासवचनं यथा स्तुतशस्त्रवतां सोमानामाहेति ३१ अपदेशो वा ग्रहाणामाम्नातत्वात् ३२ अपदेशो वा तुल्यत्वाच्चमसस्यापवादः ३३ न गुणत्वात् ३४ आम्नायते खलु सर्वत्राविशेषात् ३५ विकल्पो वा व्यपदेशात् स्तोत्रमुपाकुर्यादिति ३६ नानार्थानां समासवचनं यथा स्तुतशस्त्रवतां सोमानाहेति ३७ पृश्निग्रहाः प्राणग्रहास्तद्व्याख्यातम् ३८ प्राणभृद्भिर्गृह्येरन् लिङ्गसंयोगात् ३९ सङ्ख्यायोगाच्च दश गृह्यन्त इति ४० पृश्निप्राणग्रहान्व्यतिषजति इति ग्रहेषु नोपपद्यते ४१ ग्रहा एते मानस्थाने वा ग्रहव्यतिषङ्गात् ४२ व्यपदेशात् ४३ ग्रहशब्दाच्च

४४ स्थानान्मानकाले वचनात् ४५ प्रायणीये चोदयनीये च गृह्यन्त इति तदहीनेन व्याख्यातम् ४६

इति सङ्कर्षकाण्डे तृतीयाध्यायस्य तृतीयः पादः

अयं ग्रहपाद इत्युच्यते

तृतीयाध्यायस्य
चतुर्थः पादः

आर्षेयं वृणीते इत्यृत्विजामभिजनाचिख्यासा यथा भार्गवो होतेति १ यजमानस्य वा बन्ध्वनुकीर्तनं वाक्यशेषात् २ भृगुर्वसिष्ठेति ब्रूयादेवं सोऽनुकीर्तितो भवति ३ भार्गववासिष्ठेति वा अस्य हि तेन लिलक्षयिषैषाम् ४ त्रीन्वृणीते मन्त्रकृतो वृणीते इति मन्त्रकृतां परिमाणाचिख्यासा यथा भार्गवांस्त्रीनानयेति ५ यथर्षि वरणं सन्तानानुकीर्तनमिति समधिगतम् ६ मनुवदित्येव ब्रूयादिति वैश्यराजन्यानां यथा शेषे चतुरवत्तम् ७ आर्षेयं प्रतिषिध्य विधीयते तस्मात्तेन विकल्पार्थः ८ पुरोहितस्य प्रवरेण वृणीते पुरोहितस्यार्षेयेण वेदयेदिति विज्ञायते ९ निषादरथकाराश्च यमृषिमनुब्रुवते तेन तेषां वृणीत १० तथा ब्राह्मणानां राजोपेतानां राज्ञां च ब्राह्मणोपेतानाम् ११ द्विगोत्रस्य त्रींस्त्रीनेकैकस्माद्गोत्रादुपलक्षयेत् सन्तत्याचिख्यासा १२ वषट्कर्तृणां वा ज्ञायते १३ होतृमैत्रावरुणौ दार्शपूर्णमासिक्या दर्शपूर्णमासप्रकृतीनां कृते न सोमस्य धर्मः पशूनामस्ति तृतीयसवने कृष्णविषाणया कण्डूयनेन व्याख्यातम् १४ लौकिक्या चैकवाक्यत्वाद्यथेतरेषाम् १५ प्रैषेण यजन्त्यनुप्रैषादिभिः प्रथत इत्येकेषां सोऽन्ववेत्य विधिः १६ सप्त वृणीत इति वरणानां सङ्ख्यायोगात् १७ पुरुषवादः स्यात्तेषामपि प्रकृतत्वात् १८ निरूढपशुबन्धार्थौ तदहीनेन व्याख्यातम् १९ श्वोभूते व्रियेरन् तदर्थत्वात् यथान्यानि यज्ञाङ्गानि २० यथा समाम्नानाद्व्याख्यातम् २१ विप्रतिषेधो यज्ञाङ्गेष्वविप्रतिषिद्धं वरणम् २२

इति सङ्कर्षकाण्डे तृतीयाध्यायस्य चतुर्थः पादः

आर्षेयपादः

अथ षोडशाध्याये
चतुर्थाध्याये प्रथमः पादः

हिंकृत्य सामिधेनीरन्वाह सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्तात् १ तारमन्द्रौ अपोद्य मध्यमस्वरो विधीयते २ अन्तर्वेद्येकः पादो भवति बहिर्वेद्यन्य इति संस्थानविशेषो वाक्यैकवाक्यत्वात् ३ पञ्चदश सामिधेनीरन्वाहेति चतस्र आगमयेत् एकादश प्रकरणे श्रूयन्ते ४ लिङ्गदर्शनाच्च ५ अभ्यासेन सङ्ख्या पूर्येत प्रकरणात् यथाऽऽज्येषु सङ्ख्यापूरणम् आम्नानात् ६ सन्ततमुत्तरमर्धर्चमालमेतेत्युत्तमेनानुवच-नेन आनन्तर्यात् सन्तानम् ७ सर्वैर्वाऽविशेषात् ८ यं कामयेत सर्वमायुरियादिति आजुहोत दुवस्यतेति त्रिनवानमनूच्य सहोपक्रमेत् इत्येतेन व्याख्यातम् ९ सन्ततमन्वाहेति सामिधेनीनामविशेषात् १० वाक्याद्वा प्रथमोत्तमयोरेवायं धर्मो भवेत् ११ अवाच्यत्वान्नेति चेत्स्यात् संयोगपृथक्त्वात् १२ पूर्वेण कृतत्वाद्वा सर्वासाम् १३ सामिधेनीसन्तानस्तल्लक्षणत्वात् १४ अन्तेऽपीति चेत्स्याद्वचनात् १५ प्रकरणात्समिधेनीनां प्रथमोत्तमयोर्वादो विज्ञायते १६ सामतो वा एष तृचस्य प्रथमोत्तमयोर्वादो विज्ञायते १७ त्रिर्विगृह्णातीति सामिधेनीनामविशेषात् १८ सामन्वतो वास्य मध्यमायाः वादो भवेत् तस्याः स्थाने स्थापयतीति १९ समिद्वती घृतवती चानूच्येते इत्यृचावागमयेत् । तल्लिङ्गत्वाच्छब्दस्य २० पदवादो वा प्रकरणात् २२ ऋचि प्रणवं दधातीत्यधिकः स्याद्यथा विप्रतिषेधात् २२ लिङ्गाच्च २३ सामिधेन्यक्षरं वा विकुर्यादेतत्तस्यां निहितो भवति २४ पर्यायं वा यथा द्वे वस्त्रयुगे धारयतीति २५ अन्ते वा स्यादाम्नातायां हि श्रूयते २६ लिङ्गाच्च २७ ओङ्कारः प्रणवः स्यात् २८

इति सङ्कर्षकाण्डे चतुर्थाध्यायस्य
प्रथमः पादः
हौत्रकाध्याये सामिधेनीपादः

अथ चतुर्थाध्याये द्वितीयः पादः

त्रींस्तृचाननुब्रूयाद्राजन्यस्येति स्वच्छन्दो वर्जयित्वा वर्णच्छन्दांस्यनु-

ब्रूयादित्यालेखनः वर्णानामवरुध्य उच्यते छन्दोनुवचनात् १ प्रकृतित इत्याश्मरथ्यः नादेये प्रकृतितः प्रतीयते २ सर्वाणि च्छन्दांस्यनुब्रूयाद्बहुयाजिनः इत्यविशेषवादः शब्दसंयोगात् ३ अपि वा गायत्री त्रिष्टुप् जगती च प्रकरणात् ४ अभीक्ष्णयाजी स्यात् तेन हि स्विष्टं भवति बहुशो यो यागमनुतिष्ठत इति ५ बहुदक्षिणो वा तेनाख्यां लभेत यथा सहस्रयाजी पुरुष इति ६ सोमयाजी वा लिङ्गात् ७ सोमयाजीत्येकेषां सोऽन्ववेत्य विधिः ८ निविदां सन्ततवचनं यथा सामिधेनीनाम् ९ अनाम्नानाद्वा नोपपद्यते प्रत्यक्षाम्नानात्सामिधेनीनाम् १० आसीनमूर्ध्वज्ञुं होतारं वृणीत इति विज्ञायते ११ वरणार्थं वाऽऽसनं तत्संयोगात् १२ अध्वर्युप्रवरमेके समामनन्ति १३ अध्वर्युं प्रवरः पूर्वः स्यात् ब्रह्मण्वदाचवक्षत् इति आवाहनं देवतासु नोपपद्यते १४ यथासमाम्नानं वा तद्व्याख्यातम् १५ आवह देवान् यजमानायेति सर्वदेवतानामविशेषात् १६ प्रयाजानामेव स्थानानि १७ प्रत्यक्षेण श्रावयति अग्निमग्न आवह सोममावहेति तद्यथा ब्राह्मणानुक्त्वा मुञ्च मुञ्चेति १८ आहवनीय आवोढा सामिधेनीभिरिष्ट्वा निविद्भिरुपस्तुत्य अग्निमग्न आवहेति श्रावयति तस्मादाहवनीयस्यानन्तर्यात् १९ अग्निं होत्रायावहेति तस्मिन्नेवैतदाहुतयो हूयन्ते तदावाहयति तदग्निं स्विष्टकृतमित्याहवनीयः स्यादाहुतिसंयोगात् २० अन्यो वा व्यपदेशात् २१ स गार्हपत्यः तस्मिन्नप्याहुतयो हूयन्ते २२ लिङ्गाच्च २३ स होमायोह्येताहुतिसंयोगात् २४ होतृकर्मणे वा तल्लिङ्गत्वाच्छब्दस्य २५ होतारो यष्टारो जातवेदाश्च होतृयष्टृजातवेदशब्द उभयस्याभिधाता यष्टुरग्नेः स्वरूपस्य स्वस्य च महिम्नः २६ अतूर्तो होता आचाग्ने देवान् वह सुयजा च यज जातवेद इति आहवनीयस्य वाक्यसंयोगात् २७ स्वाहाग्निं होत्राज्जुषाण इत्युत्तमप्रयाजे तं गार्हपत्यस्य स्थानादिज्यासंयोगाच्च २८ अग्निं होत्रेणेदं हविरजुषतेति सूक्तवाके तदेतेन व्याख्यातम् २९ अयाडग्निरग्नेः प्रियाधामानीत्याहवनीयस्य यक्षदग्नेर्होतुः प्रिया धामानीत्येतेन व्यपदिश्यते ३० सुयजा यज इति कृणोतु सो अध्वरा जातवेदाः जुषतां हविः इति गार्हपत्यस्य हविस्संयोगात् ३१ अग्निर्देवो दैव्यो होता देवान् यक्षत् इत्याहवनीयस्य लिङ्गात् ३२ अग्निर्होता

वेत्त्वग्निः होत्रं वेत्तु प्रावित्रं इति स्रुगादापने ३३
इति सङ्कर्षणकाण्डे चतुर्थाध्यायस्य द्वितीयः पादः
हौत्राध्याये निगदपादः

अथ चतुर्थाध्यायस्य तृतीयः पादः

इमे वयं स्मो वयमित्येके समामनन्ति १ वषडित्येके वौषडित्येके वाक्षाडित्येके वौक्षाडित्येके वषडिति ब्राह्मणस्य वषट्कुर्यात् वौषडिति राजन्यस्य वौक्षाडिति वैश्यस्य षडिति शूद्रस्य विज्ञायते २ सन्ततमृचा वषट्करोतीति विज्ञायते ३ समानवदृचा वषट्करोतीति विज्ञायते ४ याज्याया अधि वषट्करोति इति विज्ञायते ५ अवगूर्य वषट्करोतीत्युच्चैर्वादः शब्दसंयोगात् ६ यं कामयेत प्रमायुकः स्यादिति नीचैस्तरां तस्य याज्यया वषट्कुर्यात् उच्चैः क्रौञ्चमिव वषट्कुर्यात् स्वर्गकामस्येति वषट्कारो विज्ञायते ७ यं कामयेत पशुमान् स्यात् इति बहुपर्णां तस्मै शालां कुर्यात् इति क्रौञ्चमिवेत्युच्चतरं स्वर्गकामस्य इति च अङ्गकामस्तद्व्याख्यातम् ८ यस्यै देवतायै वषट्कुर्यात् तां ध्यायेदिति पुरा वषट्कारादिति विज्ञायते ९ वषट्कृत्यापान्यान्निमिषेदपानेनैव प्राणं दधाति निमेषेण चक्षुरिति विज्ञायते १० न व्यपवदेद्याज्यां चानूवाक्यां चान्तरा यद्व्यपवदेत् यज्ञं विच्छिन्द्यात् पुरोनूच्यं यज्ञस्य सन्तत्या इति विज्ञायते ११ स्वाहा देवा आज्यया जुषाणा इति तत् प्रयाजानूयाजानां यथा आवाहने देवानाज्यपानिति १२ अनूयाजानां विज्ञायते १३ सहोत्तमेन प्रयाजेन सोप्यनिष्टो भवति तस्मिन्नितरासां संस्थावदिति १४ जुषाणयाज्यावेके समामनन्ति ऋग्याज्यावेके सहविषावेके अहविषावेके हविष्मत्युत्तरमाहेति १५ गायत्री पुरोऽनुवाक्या भवति त्रिष्टुग्याज्या त्रिपदा पुरोऽनुवाक्या भवति चतुष्पदा याज्या पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति उपरिष्टाल्लक्ष्मा याज्या मूर्धन्वती पुरोनुवाक्या भवति नियुत्वती याज्या अनुवती पुरोनुवाक्या भवति याज्या साहत्वै पुरोनुवाक्या समृद्धा याज्या अभीष्टाहरद्देवता वेत्यग्रे व्याहरति सा ह वै समृद्धा यस्यै देवतायै अधि वषट्करोति आहोस्वित्सुरभिमतीसंयोगात् याज्यानूवाक्या दर्शितेति विदितं अनुवादास्तद्व्याख्यातम् १६ गायत्र्यौ

संयाज्ये ब्रह्मवर्चसकामस्य त्रिष्टुभौ वीर्यकामस्य जगत्यः पशुकामस्य अनुष्टुभौ प्रतिष्ठाकामस्य पङ्क्त्यो यज्ञकामस्य विराजावन्नकामस्य १७ अयाड्देवानामाज्ययानां प्रिया धामानीति तत्प्रयाजान्याजानां यथा पुरस्तात् १८ अनवानं यजतीत्युत्तमानुयाजे विज्ञायते तद्वदेव सकृदेवावान्यात् एवमप्यनवानं इति विज्ञायते १९ उपांशु यजती-त्यन्यत्राश्रुतप्रत्याश्रुतेभ्यः तच्च व्याख्यातम् २० उपांशु पत्नीः संयाज-यतीत्यनेन व्याख्यातम् २१ आज्येडा सर्वेज्यानामङ्गमविशेषात् २२ पत्नीसंयाजाङ्गं हविस्संयोगात् २३ पराचीं प्रतीचीमिति कर्तुर्मुखवादः तल्लिङ्गत्वाच्छब्दस्य २४ लिङ्गाच्च २५ आम्नातो वाऽत्र पदाभ्यासः तस्य प्रतिषेधोऽयं पराचीस्सामिधेनीरन्वाहेति २६ चतुरुपह्वयत इति निगदोऽभ्यावर्तेत तल्लिङ्गत्वाच्छब्दस्य २७ पदं वा प्रकरणाद्यथा चैते समिद्वती घृतवती चानूच्येते २८ यद्ब्रूयादेतदु द्यावापृथिवी भद्रमभूदित्येतदुवेवासुरं यज्ञस्याशिषं गमयेत् इदं द्यावापृथिवी भद्रमभूदित्येव ब्रूयात् एतदेवैकेषाम् विपरीतम् । यद्ब्रूयात् सूयावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्यात् यदा हि प्रमीयते अथेमामुपावत्स्यति सूपचरणा च स्वधिचरणाचेत्येव ब्रूयात् यजमानमेव यज्ञस्याशिषं गमयति इत्येतदेवैकेषां विपरीतं यद्ब्रूयाद्विधेरिति यज्ञस्थाणुमृच्छेत् वृधात्वित्याह यज्ञस्थाणुमेव परिवृणक्ति इत्येतदेव विपरीतमेकेषाम् । यद्ब्रूयाद्योऽग्निं होतारमवृथा इति अग्निनोभयतो यजमानं परिगृह्णीयात् एतदेवैकेषां विपरीतं यद्द्वे इव ब्रूयात् भ्रातृव्यमस्मै जनयेत् घृतवतीमध्वर्यो स्रुचमास्यस्वेत्याह यजमानमेवैतेन वर्धयति इत्येतदेवैकेषां विपरीतम् त एवमुभये प्रशस्ताश्चापोदिताश्च २९ यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याशीर्गच्छेत् आशास्तेयं यजमानोसावित्याह निर्दिश्यैवैनं स्वर्गं लोकं गमयतीति विज्ञायते ३० नाम गृह्णातीति विज्ञायते नामानि गृह्णातीति विज्ञायते ३१ द्वयोर्बहूनां च नाम्नां विधानात् नाम गृह्णातीत्यवयुत्यवादः स्तावकत्वात् ३२

इति सङ्कर्षकाण्डे चतुर्थाध्यायस्य तृतीयः पादः

हौत्रकाध्याये वषट्कारपादः

अथ चतुर्थाध्यायस्य चतुर्थः पादः

एते वै प्रजापतेः कामदुहः षट्सूनाः पृथुपाजवत्यौ धाय्येऽनुपदावाज्यभागौ आनुष्टुभौ संयाज्ये इति १ कामेष्टिस्तत्रानुपदौ स्यातां तदर्थत्वात् २ वामदेव्यस्य पञ्चदशर्चः सामिधेन्यः स्युः याज्यानूवाक्याश्चेति सर्वास्सामिधेन्यः स्युः तदर्थत्वात् ३ यथार्थमितरत्र विरोधात् ४ अगस्त्यस्य कयाशुभीयसामिधेन्यो याज्यानूवाक्याश्चेत्यनेन व्याख्यातम् ५ य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेदित्येव-मुक्त्वा व्यत्यासमन्वाह इन्द्राय राथन्तरायानुब्रूहीति रथन्थरस्य ऋचमनूच्य बृहत ऋचा यजेत् इन्द्राय बार्हतायानुब्रूहीति बृहत ऋचमनूच्य रथन्तरस्य ऋचा यजेत् इन्द्राय वैराजयानुब्रूहीति वैराज-स्यर्चमनूच्य वैरूपस्यर्चा यजेत् इन्द्राय शाक्वरायानुब्रूहीति शक्वरीमनूच्य रैवत्या यजेत् इन्द्राय रैवतायानुब्रूहीति रैवतमनूच्य शक्वर्या यजेत् देवताभिर्व्यतिषजति व्यत्यासमन्वाहेति । सामान्येन विहिते पुरोडाशे इन्द्राय राथन्तरायानुब्रूहीति रथन्तरस्य ऋचमनूच्य बृहत ऋच यजेदित्युक्तम् । न बृहत्या वषट्कुर्यात् यदनुबृहत्या वषट्कुर्यात् छन्दांसि गमयेत् अनूवाक्ययोश्चत्वार्यक्षराणि याज्यामनूच्य यजति आनुष्टुभं च हवा एतत्संपादयति ६ अभि त्वाशूर नोनुमोऽदुग्धा इव धेनवः ईशानमस्य जगतः स्वर्दृशं ईशानमोमित्यनूच्य इन्द्र तस्थुपस्त्वामिद्धि हवामहे इति यजेत् । त्वमिद्धि हवामहे सातावाजस्य कारवः त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठामित्यनूच्य स्वर्वतोऽभित्वा शूर नोनुमोमिति यजेत् । एवमेतद्यथासमाम्नातस्याक्षरक्रमाद्यविरोधेनाक्षरक्रमाणामध्यूहनम् ७ द्वे याज्ये स्यातां तदर्थत्वात् ८ लिङ्गाच्च ९ उभे सप्रणवे स्यातां प्रकृत्युपबन्धात् १० गृहमेधीये देवतावाहनं न विद्यते सामिधेन्यान-न्तर्यात् तत्पुनः प्रतिषिध्यते ११ विद्यते वाऽनन्तर्यात् अकारमानन्तर्यं यथा वास्तोष्पतीये १२ वाजिनामावाहनं विद्यते यथान्यासां देवतानाम् १३ हविरनियतत्वाद्वा न विद्यते यथा विष्णोरुरुक्रमस्य १४ एतादृगिति मन्यामहे पुरःप्रवृद्धानां परतन्त्रव्यपेतानां प्रतिषेधः तल्लिङ्गत्वाच्छब्दस्य १५ एकदेवतानां नानादेवतव्यपेतातां तन्त्रमावाहनं विभवात् १६ कालपृथक्त्वादभ्यावर्तेत १७ पशावुत्तमे प्रयाजे स्रुगादापनो न विद्यते

संप्रेषितत्वात् १८ विद्यते वाऽन्यकालत्वाद्यथा याज्यासम्प्रैषो यथा याज्यासम्प्रैषः १९

इति सङ्कर्षकाराडे चतुर्थस्याध्यायस्य चतुर्थः पादः

समाप्तं चेदं सङ्कर्षकाराडम्

इति कर्ममीमांसादर्शनम्

Reference for Chapters 13-16:
Saṅkarṣhakāṇḍa,Maharṣhi Jaiminimuninā praṇītaṁ Devaswāmīviracitabhaṣhyamanvalitam. Ed. by S. Subrahmanya Shastri, University of Madras, 1965.